कर्तरि त्वरते। अत्वरिष्ट। तत्वरे। त्वरितासे। भावे। त्वर्यते। अत्वारि। णिचि त्वरयति ते। अतत्वरत् त। कर्म्मणि अत्वरि अत्वारि।

कृत्सु त्वरणीयम्। त्वरणम्। त्वारः त्वारकः। त्वारी। त्वरिता। त्वरितः त्वर्णः। त्वरा। त्वरितव्यम्। त्वरित्वा।

Digitized by Google

सम्त्वर्च्य। त्वार्च्यम्। त्वरमाणः णिचि त्वर्च्यमाणः। त्वरिष्यमाणः।

दण्ड दण्डने अदन्तचुरादिः उभयपदी द्विक० सेट्।

कर्त्तरि दण्डयति ते। अदण्डयत् त। दण्डयितासि से। कर्मणि दण्ड्यते अदण्डि।

कृत्सु दण्डनीयम्। दण्डनम्। दण्डः। दण्डकः। दण्डी। दण्डयिता। दण्डितः। दण्डना। दण्डयितुम्। दण्डयितव्यम्। दण्डित्वा। सन्दण्ड्य दण्ड्यः। दण्डयन्मानः। दण्ड्यमानः। दण्डयिष्यन्ष्यमाणः कर्मणि दण्डिष्यमाणश्च।

दन्श दंशने भ्वादिगणीयः पर० सकर्मकः अनिट्।

कर्त्तरि दशति। दशेत्। दशतु। अदशत्। अदाङ्क्षीत् अदाङ्ष्टाम्। ददंश ददंशतुः ददशतुः। दश्यात्। दङ्क्ष्यति। कर्मणि दश्यते। अदंशि। णिचि दंशयति-ते। अददंशत्-त। सनि दिदङ्क्षति। यङि दंदश्यते।

कृत्सु दंशनीयम्। दंशनम्। दंशकः। दंशः। दंशी। दंष्टा। दष्टः। दष्टिः। ष्ट्रन्-दंष्ट्रा। दंष्टुम्। दंष्टव्यम्। दष्ट्वा। उपदश्य। दंश्यम्। दशन् दंक्ष्यन् दंक्ष्यमाणः। यङ ञक ददंशूकः।

सम्—सन्दंशे (उभयपार्श्वतः कर्षणे) (सहभक्षने च) संदशति। संदंशः। संदंशितः। उप—उपदंशे (सहभोजने) मूलकेनोपदशति। णमुल् मूलकोपदंशम्।

Digitized by Google

दन्भ दम्भे स्वादिगणीयः परस्मैपदी अक० सेट्।

कर्त्तरि दम्भोति दम्भुतः। अदम्भीत्। ददम्भ देभतुः ददम्भतुः देभिथ ददम्भिथ। भावे दभ्यते। अदम्भि। णिचि दम्भयति-ते। अदीदम्भत् त सनि दिदम्भिषति धीप्सति।

कृत्सु दम्भनीयम्। दम्भनम्। दम्भः। दम्भकः। दम्भी। दम्भिता। दब्धः। दब्धिः। दम्भितुम्। दम्भितव्यम्। दम्भित्वा दब्ध्वा। संदभ्य। दम्भाः। दभ्नुवन्। दम्भिष्यन्।

दम दमने दिवादिगणीयः अकर्मकः पर० सेट्।

कर्तरि दाम्यति। अदमत् अदमीत्। ददाम। देमतुः। भावे दम्यते। अदमि। णिचि। दमयति ते। अदीदमत् त।

कर्मणि अदमि अदामि।

कृत्सु दमनीयम्। दमनम्। दमः। दमकः। दमी। दमिता। दान्तः। दान्तिः। दमितुम्। दमितव्यम्। दमित्वा दान्त्वा। संदम्य। दम्यः। दाम्यन्। दमिष्यन्।

दय दयने गतौ च स्वादिगणीयः आत्मनेपदी सकर्मकः सेट्।

कर्त्तरि दयते। अदयिष्ट। देये। कर्मणि दय्यते। अदायि।

कृत्सु दयनीयम्। दयनम्। दायः दायी। दयिता। दयितः। दया। दयितुम्। दयितव्यम्। दयित्वा। संदय्य। दाय्यम्। दयमानः दयिष्यमाणः।

Digitized by Google

दल भेदने भ्वादिगणीयः परः० सकर्मकः सेट्।

कर्तरि दलति। अदालीत्। ददाल देलतुः। कर्मणि दल्यते। अदालि। णिचि दालयति ते दलयति ते। अदीदलत् त। कर्मणि दाल्यते दल्यते अदालि अदलि।

कृत्सु दलनीयम्। दलनम्। अच्-दलम्। दालकः। उद्दालकः। दाली। दलिता। दलितः। दलितुम्। दलितव्यम्। दलित्वा संदल्य। दाल्यः। दलन्। दलिष्यन्। दलिष्यमाणः।

दह दाहे भ्वादिगणीयः परः० सकर्मकः अनिट्।

कर्तरि दहति। अधाक्षीत्। ददाह देहतुः देहिथ ददग्ध। दग्धा। दक्ष्यात्। धक्ष्यति। कर्मणि दह्यते। अदाहि। णिचि दाहयति ते। अदीदहत् त। सनि दिधक्षति यङि दंदह्यते।

कृत्सु दहनीयम्। दहनम्। दाहः दाहकः। दाही। दग्धा। दग्धः। दग्धिः दग्धुम्। दग्धव्यम्। दग्ध्वा। संदह्य। दाह्यः। दहन् दह्यमानः। धक्ष्यन् धक्ष्यमाणः। सनः दिधक्षा। दिधक्षुः। दिधक्षन्। यङः। दंदह्यमानः।

दा दाने जुहोत्यादिगणीयः उभयपदी सकर्मकः अनिट्।

कर्तरि ददाति दत्तः ददति। ददासि दत्थः दत्थ। ददामि दद्वः दद्मः। दत्ते ददाते ददते दत्से ददाथे दद्ध्वे। ददे दद्वहे दद्महे। दद्यात् ददीत। ददातु दत्ताम्।

Digitized by Google

अदात्। अदत्त। अदात् अदित अदिषाताम्। ददौ ददतुः ददिथ ददाथ ददे दद्विषे। दातासि-से। देयात् दासीष्ट। दास्यति-ते। कर्मणि दीयते। अदायि णिचि दापयति ते। अदीदपत्। सनि दित्सति-ते। यङि देदीयते।

लृत्सु दानीयम्। दानम्। दायः। दायकः। दायी। दाता। दत्तः। प्रदत्तः प्रत्तः। नीत्तः। दत्तिः प्रत्तिः प्रदत्तिः। दातुम् दातव्यम्। दत्त्वा। सन्दाय। देयम्। ददत् ददानः। दास्यन्-स्यमानः। ददिवान् क्विमन् दत्तिमः। सन्नः दित्सा। दित्सुः। दित्सन्।

दाण् दाने भ्वादिगणीयः परस्मैपदी सकर्मकः अनिट्। णित्।

कर्त्तरि यच्छति। अदात्। ददौ। कर्मणि दीयते। अदायि। लृत्सु जुहोत्यादिगणीयवत्। अभिष्टव्यवहारे सम्-आमने-पदम् संयच्छते वेणया वल्गम्।

दिव क्रीड़ाजिगीषाव्यवहारादिषु दिवा० परस्मैपदी क्रीड़ादौ अक० व्यवहारादौ सक० सेट्।

कर्तरि दीव्यति। अदेवीत्। दिदेव। देविता। दीव्यात्। देविष्यति। भावे कर्मणि च दीव्यते। अदेवि णिचि देवयति-ते। अदीदिवत्-त। सनि दिदेविषति दुद्यूषति। यङि देदीव्यते।

Digitized by Google

कृत्सु देवनीयम्। देवनम्। देवः। देवकः। देवी। देविता। द्यूनः। द्यूतिः। देवितुम्। देवितव्यम्। देवित्वा द्यूत्वा। सन्दीव्य। देव्यम्। दीव्यन्। दीव्यमानः। देविष्यन्। ष्यमाणः। क्विप् अक्षद्यूः। सनः दुद्यूषा दिदेविषा। दुद्यूषः दिदेविषुः। दुद्यूषन् दिदेविषन्। परिदेवि-परिदेवने परिदेवयति-ते परिदेवना। आजिगीषाम् आदीव्यति। आद्यूनः औदरिकः।

दिश देशने तुदादिगणीयः उभयपदी सकर्मकः अनिट्।

कर्तरि दिशति-ते। अदिक्षत्-त। दिदेश। दिदेशिथ दिदिशे। देष्टासि-से। देक्ष्यति-ते। कर्मणि। दिश्यते। अदेशि। णिचि देशयति-ते। अदीदिशत्-त। सनि दिदिक्षति। यङि देदिश्यते।

कृत्सु देशनीयम्। देशनम्। देशः। देशकः। देशी। देष्टा। दिष्टः। दिष्टिः। ण्यन्तस्य देशना। देष्टुम्। देष्टव्यम्। दिष्ट्वा। उपदिश्य। देश्यम् दिशन् दिश्यमानः दिक्ष्यमाणः। उप—उपदेशे उपदिशति शिक्षयतीत्यर्थः। सम्—सन्देशे (वाचिकवार्त्ताकथने) सन्दिशति। आ—आज्ञायाम् आदिशति। उत्—उद्देशे उद्दिशति। अति—अतिदेशे (तुल्यतया कथने) अतिदिशति। अप—अपदेशे अपदिशति। अपदेशश्च छलम्। व्यप—संज्ञाकरणे व्यपदिशति सङ्केतितं करोति। नि नियोगे निदिशति निदुङ्क्ते। निर्—निर्देशे निर्दिशति कथयतीत्यर्थः।

Digitized by Google

दिह लेपने अदादिगणीयः उभयपदी सकर्मकः अनिट्।

कर्तरि देग्धि दिग्धः दिहन्ति। धेच्चि दिग्धः। दिग्ध देग्धि दिह्वः दिह्मः दिग्धे धिक्षे। दिह्यात्। दिक्षीत। देग्धु दिग्धाम्। अधेक् अधेग् अदिग्ध। अधिक्षत्, अदिग्ध-अधिक्षत, अधिक्षाताम्, अधिक्षन्त, अधिक्षथाः-अदिग्धाः, अधिक्षि, अदिह्वहि-अधिक्षावहि, अदिह्महि अधिक्षामहि। दिदेह दिदिहे। देग्धासि-क्षे। दिक्षात् धिक्षीष्ट। धेक्ष्यति-क्षे। कर्मणि दिह्यते। अदेहि। णिचि देहयति-ते। अदीदिहत्-त। सनि दिधिक्षति-क्षे। यङि देदिह्यते।

कृत्सु देहनीयम्। देहनम्। देहकः देही। देग्धा। दिग्धः। दिग्धिः देग्धुम्। देग्धव्यम्। दिग्ध्वा उपदिह्य। देह्यम्। दिहन् दिहानः। धे-क्ष्यन् क्षमाणः।

सम्—संक्षये सक० संदेग्धि। संदेहः। संदिग्धः संदिहानः।

दीक्ष मौण्डेज्योपनयननियमव्रतादाधाने भ्वादिगणीयः अकर्मकः आत्मनेपदी सेट्।

कर्तरि दीक्षते। अदीक्षिष्ट। भावे कर्मणि दीक्ष्यते अदीक्षि। णिचि दीक्षयति-ते अदिदीक्षत्-त।

कृत्सु दीक्षणीयम्। दीक्षणम्। दीक्षकः दीक्षी। दीक्षिता। दीक्षितः। दीक्षा। दीक्षितुम्। दीक्षितव्यम्। दीक्षित्वा। सन्दीक्ष्य। दीक्षमाणः। दीक्षिष्यमाणः।

Digitized by Google

दीप दीप्तौ दिवादिगणीयः अक० आत्मनेपदी सेट्।

कर्तरि दीप्यते। अदीपि-अदीपिष्ट। दिदीपे। दीपितासे। भावे दीप्यते। अदीपि। णिचि दीपयति-ते। अदीदिपत्-त-अदिदीपत्-त। सनि दिदीपिषते। यङि देदीप्यते।

कृत्सु दीपनीयम्। दीपनम्। दीपनः। दीपः। दीपकः। दीपी। दीपिता। दीप्तः। दीप्तिः। ण्यन्तस्य दीपना। दीपितुम्। दीपितव्यम्। दीपित्वा। सन्दीप्य। दीप्यम्। दीप्यमानः। दीपिष्यमाणः। यङः देदीप्यमानः। उत्—उद्दीपने उद्दीपयति उत्तेजयतीत्यर्थः। उद्दीपितः उद्दीपना।

दु अनुतापे भ्वादिगणीयः पर० अक० अनुतापने सक० वेट्।

कर्तरि दुनोति दुस्तः दुन्वन्ति। दुनुयात्। दुनोतु। अदुनोत्। अदावीत् अदौषीत्। दुदाव दुदुविथ। दविता दोता। दूयात्। दविष्यति दोष्यति। भावे दूयते। अदावि।

णिचि दावयति-ते। अदूदवत्-त सनि दुदूषति। यङि दोदूयते।

कृत्सु दवनीयम्। दवनम्। दवनः। दवः। दावः। दावकः। अथुच् दवथुः। दावी। दविता दोता। दूनः दवितुम् दोतुम्। दवितव्यम्। दोतव्यम्। दवित्वा। दुत्वा। संदूय। दव्यम् आवश्यके तु दाव्यम्। दुन्वन्। दवि-ध्यन्-ध्यमाणः दो ध्यन्-ध्यमाणः।

Digitized by Google

दुःख दुःखितकरणे अदन्तचुरादि उभयपदी सक० सेट्।

कर्तरि दुःखयति-ते। मतान्तरे दुःखापयति-ते। अदुदुःख-त्-त। अदुदुःखपत्-त।

दुष दोषे दिवादिगणीयः परस्मैपदी अकर्मकः अनिट्।

कर्तरि दुष्यति। अदुषत् अदुष्यत्। दुदोष। दोष्टा। दोक्ष्यति। भावे दुष्यते। अदोषि। णिचि दूषयति ते। चित्तविकारे तु दूषयति-ते दोषयति-ते चित्तम्। अदूदुषत्-त।
क्तत्सु दोषणीयम्। दोषणम्। दोषः। दोषकः। दोषी। ख्युन्लक्ष्य दूषणीयम्। दूषणम्। दूषकः दूष्यम् इत्यादि। दुष्टः। दुष्टिः। दोष्टुम्। दोष्टव्यम्। दुष्ट्वा। संदुष्य। दुष्यम्। दुष्यन्।

दुह दोहने अदादिगणीयः उभयपदी द्विक० अनिट्।

कर्तरि दोग्धि दुग्धः दुह्न्ति धोक्षि दुग्धः दुग्ध दोह्मि दुह्वः दुह्मः। दुग्धे दुहाते दुहते धुक्षे दुहाथे धुग्ध्वे। दुह्यात् दुहीत। दोग्धु दुग्धाम्। अधुक्-ग् अदुग्ध। अधुक्षत्, अधुक्षत अदुग्ध, अधुक्षताम् अधुक्षन्त, अधुक्षथाः-अदुग्धाः, अधुक्षि, अदुह्वावहि-अदुह्वहि, अधुक्षामहि। दुदोह दुदोहिथ दुदुहिव दुदुहे। दोग्धासि-से। दुह्यात् धुक्षीष्ट। धोक्ष्यति-ते।
कर्मणि। दुह्यते। अदोहि। णिचि दोहयति-ते। अदूदुहत्-त। सनि दुधुक्षति। यङि दोदुह्यते।

Digitized by Google

कृत्सु दोहनीयम्। दोहनम्। दोहः। दोहकः। दोही। दोग्धा। दुग्धम्। दुग्धः। दोग्धुम्। दोग्धव्यम्। दुग्ध्वा। संदुह्य। दुह्यम् दोह्यम्। दुहन् दुहानः दुह्यमानः। धोक्ष्यन् क्ष्यमाणः। कामदुक्। कामदुघा गौः। सनः दुधुक्षा दुधुक्षुः। दुधुक्षन्। यङः दोदुह्यमानः।

दू खेदे दिवादिगणीयः आत्मनेपदी अकर्मकः सेट्।

कर्तरि दूयते। अदविष्ट। दुदुवे। दविताऽसे। दविषीष्ट। दविष्यते। भावे दूयते। अदावि। णिचि दावयति-ते। अदूदवत्-त। सनि दुदूषते।

कृत्सु दवनीयम् दवनम्। दावः दावकः। दावी। दविता। दूनः। दूतिः। दवितुम्। दवितव्यम्। दूत्वा। संदूय। दव्यम् आवश्यके तु दाव्यम्। दूयमानः दविष्यमाणः।

इ आदरे तुदादिगणीयः आत्मनेपदी सकर्मः अनिट् प्रायेणाङ्पूर्वः।

कर्तरि आद्रियते। आदृत। आदद्रे आदद्रिषे। आदर्त्ताऽसे। आदृषीष्ट। आदरिष्यते।

कर्मणि आद्रियते। आदारि। णिचि। आदारयति-ते। आदीदरत्-त। सनि आदिदीर्षते।

कृत्सु आदरणीयम्। आदरणम्। दरः आदरः आदारकः। दूनि-आदरी। आदर्त्ता। आदृतः। आदृतिः आदर्तुम्। आदर्त्तव्यम्। आदृत्य। आदृत्यः। आद्रियमाणः। आदरिष्यमाणः।

Digitized by Google

दृप हर्षे गर्वे च दिवादिगणीयः पर० अक० वेट्।

कर्तरि दृप्यति। दृप्येत्। दृप्यतु। अदृप्यत्। अदर्पीत् अद्राप्सीत् अदाप्सीत् अदृपत्। ददर्प, ददर्पिथ ददृप्थ ददर्पथ दर्पिता द्रप्ता दर्प्ता। दर्पिष्यति द्रप्स्यति दर्पस्यति। भावे दृप्यते। अदर्पि। णिचि दर्पयति-ते। अदीदृपत्-त अददर्पत्-त सनि दिदृर्पिषति दिदृप्सति। यङि दरीदृप्यते।

कृत्सु दर्पणीयम्। दर्पणम्। दर्पणः। दर्पकः। दर्पी। दर्पिता द्रप्ता दर्प्ता। दृप्तः। दृप्तिः। दर्पितुम्। द्रप्तुम् दर्प्तुम्। दर्पितव्यम् द्रप्तव्यम् दर्प्तव्यम्। दर्पित्वा दृप्त्वा। संदृप्य। दृप्यः। दृप्यन् दर्पिष्यन् द्रप्स्यन् दर्पस्यन्।

दृश दर्शने भ्वादिगणीयः पर० सक० अनिट्।

कर्तरि पश्यति। पश्येत्। पश्यतु। अपश्यत्। अदर्शत् अद्राक्षीत्। ददर्श, ददर्शिथ-ददृष्ठ, ददृशिव। द्रष्टा। द्रक्ष्यति।

कर्मणि दृश्यते। अदर्शि अदर्शिषाताम् अदृक्षाताम्। दर्शितासे द्रष्टासे। दर्शिषीष्ट दृक्षीष्ट। णिचि दर्शयति-ते। अदीदृशत्-त अददर्शत्-त। सनि आत्म० दिदृक्षते।

कृत्सु दर्शनीयम् दर्शनम्। दर्शः। सुदर्शनः सुदर्शः। दर्शकः। दर्शी। द्रष्टा। दृष्टः। दृष्टिः। ण्यन्तस्य दर्शितः। एवं दर्शना। द्रष्टुम् दर्शयितुम्। द्रष्टव्यम् दर्शयितव्यम्। दृष्ट्वा दर्शयित्वा। संदृश्य संदर्श्य। दृश्यम् दर्श्यम्। पश्यन्

Digitized by Google

दर्शयन् मानः दृश्यमानः दर्श्यमानः। द्रक्ष्यन्। द्रक्ष्यमाणः कर्तरि दृष्टवान् दृष्टवान्। कर्मणि दर्शितवान्दर्शितवान्च। अयन्तस्य दर्शयिषन्। षमाणः। सनः दिदृक्षा। दिदृक्षुः। दिदृक्षमाणः। अयन्तस्य कर्मणः कर्तरि आत्मनेपदं दर्शयते राजा भृत्यान्।

हृ विदारे क्र्यादिगणीयः परः सकः सेट्।

कर्तरि हृणाति। अहारीत् अहारिष्टाम्। ददार, ददृतुः-ददरतुः, ददरिथ। हरीता हरिता। हीर्ष्यात्। हरीषति हरिष्यति। कर्मणि हीर्यते। अहारि। हृद्रे ददरे। णिचि दारयति-ते। अदिदरत्-त। दिदरीषति दिदरिषति। दिहीर्षति।

कृत्सु हरणीयम्। हरणम्। हारः। हारकः। हारी। हरीता हरिता। हीर्णः। हीर्त्तिः। हरीतुम् हरितुम्। हरीतव्यम् हरितव्यम्। हीर्त्वा। संहीर्य्य। हार्य्यम्। हृणन् हीर्य्यमाणः। हरीषन् हरिषन्। हरीषमाणः हरिषमाणः कर्मणि हारिषमाणश्च। अस्य कर्मकर्तरि हीर्य्यते केचित्तु दिवादावेनं पठित्वा हीर्य्यतीत्यपि रूपमाहुः।

देव देवने भ्वादिगणीयः आत्मनेपदी अकः सेट्।

कर्तरि देवते। अदेविष्ट। दिदेवे। भावे देव्यते। अदेवि। णिचि देवयति-ते अदिदेवत्-त।

Digitized by Google

कृत्सु देवनीयम्। देवनम्। देवः। देवकः। देवी। देवितुम्। देवितः। देवा। देवितुम्। देवित्वा। संदेव्य। देवमानः। देविष्यमाणः। परि-विलापे परिदेवते। पर्व्वदेवित्त सा पुर इति भट्टिः।

देव परिदेवने चुरादिगणीयः आत्मनेपदी सक० सेट्। केचित्त्वेनं दिव इत्याऽऽहुः।

कर्तरि। देवयते। अदिदेवत।

कृत्सु देवयिता। देवयितुम्। देवना। देवयितव्यम्। देवयित्वा। देवयमानः। देवयिष्यमाणः इत्यादिभेदः। अन्यत् भ्वादिगणीयवत्।

दो खण्डने दिवादिगणीयः परस्मैपदी सकर्मकः अनिट्।

कर्तरि द्यति द्यतः द्यन्ति। द्येत्। द्यतु। अद्यत्। अदात्। दद्यौ। दाता। देयात्। कर्मणि दीयते। अदायि, अदायिषाताम्। अदिषाताम्। दद्रे। णिचि दापयति-ते। अदीदप-त्-त। सनि दित्सति।

कृत्सु दानीयम्। दानम्। दायः। दायकः। दायी। दाता। दितः। दितिः। दातुम्। दातव्यम्। दित्वा। संदाय। देयम्। द्यन् दीयमानः। दा स्यन् स्यमानः।

द्यु गतौ अदादिगणीयः पर० सकर्मकः अनिट्।

कर्तरि द्यौति द्युतः द्युवन्ति। द्युयात्। द्यौतु। अद्यौत्। अद्यौषीत्। दुद्याव दुद्यविथ-दुद्योथ दुद्यविव। द्योता।

Digitized by Google

द्योष्यति। कर्मणि द्यूयते। अद्यावि। णिचि द्यावय-ति-ते। अदुद्यव-त्-त। सनि दुद्यूषति।

कृत्सु द्यवनीयम्। द्यवनम्। द्यवः। द्यावकः। द्यावी। द्योता। द्युतः। द्युतिः। द्योतुम्। द्योतव्यम्। द्युत्वा। संद्युत्य। द्यव्यम् द्याव्यम्। द्युवन् द्यूयमानः द्योष्यन्-ष्यमाणः।

द्युत विद्योते भ्वादिगणीयः आत्मनेपदी अकर्मकः सेट्।

कर्त्तरि द्योतते। द्योतेत। द्योततां। अद्योतत। लुङि उभयपदी अद्युतत् अद्योतिष्ट। दिद्युते। द्योतितासे। द्योतिषीष्ट। भावे द्युत्यते। अद्योति। णिचि द्योतय-ति-ते अदुद्युतत्। सनि दिद्योतिषते।

कृत्सु। द्योतनीयम्। द्योतनम्। द्योतः। द्योतकः। द्योती। द्योतिता। द्युतितम् द्योतितम्। द्युक्तिः विद्युत्। द्योतितुम्। द्योतितव्यम्। द्योतित्वा। संद्युत्य। द्योत्यम्। द्योतमानः द्योतिष्यमाणः।

द्रु द्रवे गतौ च भ्वादिगणीयः पर० द्रवे अक० गतौ सकर्मकः अनिट्।

कर्त्तरि द्रवति। द्रवेत्। अदुद्रुवत्। दुद्राव दुद्रविथ दुद्रोथ, दुद्रुव। द्रोता। द्रोष्यति। कर्मणि द्रूयते। अद्रावि। णिचि द्रावय-ति-ते। अदुद्रव-त्-त। सनि दुद्रूषति।

कृत्सु द्रवणीयम्। द्रवणम्। द्रवः। द्रावः द्रावकः। द्रावी। द्रोता। द्रुतः। द्रुतिः। द्रोतुम्। द्रोतव्यम्। द्रुत्वा। संद्रुत्य। द्रव्यम् द्राव्यम्। द्रवन्। द्रूयमाणः। द्रो-ष्यन् ष्यमाणः।

Digitized by Google

वि—विद्रवे पलायने च विद्रवति। उप—उपद्रवे (अनिष्टोत्पादने) उपद्रवति। उपद्रुतः।

द्रुह द्रोहे दिवादिगणीयः पर० उपसर्गे सक० अन्यथा अक० वेट्।

कर्तरि भृत्याय द्रुह्यति। अद्रोहीत्। अद्रुहत्। द्रुद्रोह द्रुद्रोहिथ-द्रुद्रोग्ध-द्रुद्रोढ। द्रोहिता द्रोग्धा द्रोढा। द्रोहिष्यति द्रोक्ष्यति। कर्मणि। भृत्योऽभिद्रुह्यते। आद्रोहि आद्रुह्याताम्-आद्रोहिषाताम्, आद्रोहिषत-आद्रुहन्त। आदुद्रुहे-आदुद्रुहिषे-आदुद्रुहे। णिचि द्रोहय-ति-ते। अदुद्रुह-त्-त।

क्तत्सु द्रोहणीयम्। द्रोहणम्। द्रोहः। द्रोहकः। द्रोही। द्रोहिता। द्रोग्धा द्रोढा। द्रुग्धः। द्रूढः। द्रुग्धिः द्रूढिः। द्रोहितुम् द्रोग्धुम् द्रोढुम्। द्रोहितव्यम् द्रोग्धव्यम् द्रोढव्यम्। द्रुग्ध्वा द्रूढ्वा संद्रुह्य। द्रोह्यः। द्रुह्यन् अभिद्रुह्यमाणः। द्रोहि-ष्यन् ष्यमाणः द्रोक्ष्य-न् माणः। मित्रद्रुक्-ग् मित्रद्रुट्-ड्।

द्विष द्वेषे अदादिगणीयः उभयपदी सक० अनिट्।

कर्तरि द्वेष्टि द्विष्टः द्विषन्ति द्वेक्षि द्विष्टे। द्विष्यात् द्विषीत। द्वेष्टु द्विड्ढि द्वेषाणि द्विषाम्। अद्वेट्-ड् अद्विष्ट। अद्विषन् अद्विक्षत दिद्वेष विद्विषे। द्वेष्टा-सि-से। द्वेक्ष्य-ति ते। कर्मणि द्विष्यते। अद्वेषि। णिचि द्वेषय-ति-ते। अदिद्विष-त्-त।

Digitized by Google

कृत्सु द्वेषणीयम्। द्वेषणम्। द्वेषः। द्वेषकः। द्वेषी। द्वेष्टा। द्विष्टः। द्विष्टिः द्वेष्टुम्। द्वेष्टव्यम्। द्विष्ट्वा। सन्द्विषः। द्वेषः। द्विषन् द्विषाणः द्विषमाणः द्वे-ष्वन् ष्यमाणः।

धा धारणे पोषणे च जुहोत्यादिः उभयपदी सकः अनिट्।

कर्तरि दधाति धत्तः दधति दधासि धत्थः धत्थ दधामि दध्वः दध्मः। धत्ते दधाते दधते धत्से दधाथे दद्ध्वे दधे दध्वहे दध्महे। दध्यात्। दधीत। दधातु धत्ताम्। अदधात् अधत्त। अधात् अधित अधिषाताम्। दधौ दधे। धाता-सि-से। धेयात् धासीष्ट। धा-स्नु-ति-ते। कर्मणि धीयते। अधायि अधायिषाताम्-अधिषाताम्। णिचि धापयति-ते। सनि धित्स-ति-ते।

कृत्सु धानीयम्। धानम्। धायः। धायकः। किं उदधिः दधिः। धायी। धाता। हितः। हितिः अन्तर्धा। श्रद्धा। धातुम्। धातव्यम्। हित्वा। सन्धाय। धेयम्। दधत् दधानः। धीयमानः। धा-स्नु स्नमानः कर्मणि धायिषमाणश्च।

सम्—सन्धाने संदधाति। अनुसम्—अनुसन्धाने अनुसंदधाति वि—विधाने विदधाति। अन्तर्—अन्तर्धाने अन्तर्दधाति। तिरस्—तिरोधाने तिरोदधाति। श्रद्—श्रद्धायाम् श्रद्दधाति। नि—निधाने निदधाति। अभि—अभिधाने अभिदधाति। परि—परिधाने परिदधाति। आ—आधाने आदधाति। प्रनि—प्रणिधाने प्रणिद-

Digitized by Google

धाति। सम्नि—सन्निधाने सन्निदधाति। उप-आ-उपाधौ उपादधाति। वि-आ-व्याधौ व्यादधाति। वि-अव-व्यवधाने व्यवदधाति। अव-अवधाने अवदधाति। उप-उपधाने। (शयनोपकरणभेदकरणे) उपदधाति। सम्-आ-समाधाने समादधाति।

धिन्व प्रीतौ गतौ च भ्वादिगणीयः प्रीतौ अक० प्रीणने गतौ च सक० सेट्।

कर्तरि धिनोति धिनुतः धिन्वन्ति धिनोषि धिनुथः धिनुथ धिनोमि धिन्वः-धिनुवः, धिन्मः-धिनुमः। धिनुयात्। धिनोतु। अधिनोत्। अधिन्वीत्। दिधिन्व। धिन्विता। धिन्व्यात्। कर्मणि धिन्व्यते। अधिन्वि।

कृत्सु धिन्वनीयम्। धिन्वनम्। धिन्वकः धिन्वितः। धिन्वित्वा। धिन्वन्। धिन्वमानः। धिन्विष्यन् ष्यमाणः।

धु कम्पे स्वादिगणीयः उभयपदी अकर्मकः कम्पने सक० अनिट्।

कर्तरि धुनोति धुनुतः धुन्वन्ति धुनोषि धुनोमि धुन्वः-धुनुवः, धुन्मः-धुनुमः। धुनुते धुन्वाते धुन्वते। धुनुयात् धुन्वीत। धुनोतु धुनुताम्। अधुनोत् अधुनुत। माणिनीयमते अधौषीत् मुग्धबोधमते-तु अधावीत् अधुत। दुधाव दुधुवे। धोता-सि-से। धूयात् धोषीष्ट। भावे धूयते। अधावि। णिचि परः धावयति। अदूधवत्। सनि दुधूषति ते। यङि दोधूयते।

Digitized by Google

कृत्सु धवनीयम्। धवनम्। धवः। धावकः। धावी। दूत्र-धवित्रम्। धौता। धुतः। धुतिः। धौतुम्। धौतव्यम्। धुत्वा। सन्धुत्य। धव्यम्। धाव्यम्। धुन्वन् धुन्वानः। यङः दोधूयमानः। धोधून्।

धुर्व् हिंसने भ्वादिगणीयः सकर्मकः परः० सेट्।

कर्तरि धूर्वति। अधूर्वीत्। दुधूर्व्व।
कृत्सु। धुर्व्वणम्। धूर्त्तः। धूर्त्तिः। धूर्त्वा। क्विप् धूः।

धू कम्पे क्र्यादिगणीयः उभयपदी अकर्मकः
कम्पने सकर्मकः वेट्।

कर्तरि धुनाति धुनीतः धुन्वन्ति। धुनीते धुनाते धुनते। धुनीयात् धुनीत। धुनोतु धुनीताम्। अधुनात् अधुनीत। केचित्तु धूनातीत्याद्याहुः धूनाति कम्पकवनानीति कविरहस्यम्। पाणिनीयमते अधावीत् मुग्धबोधमते अधावीत्-अधौषीत्। दुधाव। धविता-सि-से धोतासि-से। धूयात् धविषीष्ट-धोषीष्ट। धविषाति-ते-धोषाति-ते। भावे कर्मणि च धूयते। अधावि। णिचि परः० धूनयति अदुधूनत्। सनि दुधूषति-ते।
कृत्सु धवनीयम्। धवनम्। धविता। धौता। धूनः धूनिः। धवितुम् धौतुम्। धवित्वा धूत्वा। संधूय। धुनन्। धुनानः। मतान्तरे धूतः। धूतिः। धूनन् धूनानः। धूयमानः। धविष्यन् ष्यमाणः। धोष्यन् ष्यमाणः।

Digitized by Google

धूप सन्तापने भ्वादिगणीयः परस्मैपदी सकर्मकः सेट्।

कर्तरि धूपायति। धूपायेत्। धूपायतु। अधूपायत्। अधूपायीत्। अधूपीत्। धूपायाम्-बभूव आस-चकार-दुधूप। धूपायिता। धूपिता। धूपाय्यात् धूप्यात्। धूपायिष्यति धूपिष्यति। कर्मणि धूपाय्यते धूप्यते। अधूपायि अधूपि। णिचि धूपाय-ति-ते धूपय-ति-ते। अदुधूपाय-त्-त। अदूधुप-त्-त।

कृत्सु धूपायनीयम् धूपनीयम्। धूपायनम् धूपनम्। धूपायकः धूपकः। धूपायिता धूपिता। धूपायितः धूपितः। धूपाया धूपा। धूपायितुम् धूपितुम्। धूपायन् धूपयन्। धूपायि-घ्यन् घ्यमाणः। धूपि-घ्यन् घ्यमाणः।

धृ स्थितौ तुदादिगणीयः आत्मनेपदी अकर्मकः अनिट्।

कर्त्तरि ध्रियते। अधृत। दध्रे। धर्त्तासे। धृषीष्ट। धरिष्यते। कर्मणि ध्रियते। अधारि। णिचि धारय-ति-ते। अदीधर-त्-त। कर्मणि धार्य्यते। अधारि। सनि दिधरिषते।

कृत्सु धरणीयम्। धरणम्। धरः। धारः। धारकः। धारी। धृतः। धृतिः। धर्त्तुम्। धर्त्तव्यम्। धृत्वा। संधृत्य। धार्य्यम्। ध्रियमाणः धरि-घ्यन् घ्यमाणः। णिजन्तस्य धनुर्द्धरः वंशधरः। धारयिता धारयित्वा धारितः धारणा। धारय-न् माणः धार्य्यमाणः।

सन्तोषार्थकस्तु उभयपदी भ्वादिगणीयः धरति-ते इत्यादि।

Digitized by Google

धृष संहतौ हिंसायाञ्च स्वादिगणीयः परस्मैपदी सकर्मकः सेट्।

कर्तरि धर्षति । धर्षेत् । अधर्षीत् । दधर्ष दधृषतुः । धर्षिता । कर्मणि धृष्यते अधर्षि स्विचि धर्षय-ति-ते । अद्दीधृष-त्-त अदधर्ष-त्-त ।

कृत्सु धर्षणीयम् । धर्षणम् । धर्षः । दुर्धर्षणः दुर्धर्षः । धर्षकः । धर्षी । धर्षिता । धर्षितः । धृष्टिः स्वन्तस्य धर्षणा । धर्षितुम् । धर्षितव्यम् । धर्षित्वा धृष्ट्वा । संधृष्य । धृष्यः । धर्षन् धृष्यमाणः । धर्षि-यन् यमाणः । ल्युनङ् धृष्णक्—क्नु धृष्णुः ।

धृष प्रागल्भ्ये स्वादिगणीयः परस्मैपदी अकर्मकः सेट् ।

कर्तरि धृष्णोति धृष्णुतः । धृष्णुयात् । धृष्णोतु । अधृष्णोत् । अन्यत् सर्वं स्वादिगणीयवत् निष्ठायां धृष्टम् धर्षितम् शतरि धृष्णन्, क्त्वा प्रत्यये धर्षित्वा इति भेदः ।

धृष अमर्षे वा० चुरादिगणीयः उभयपदी पक्षे स्वादिगणीयः परः० सेट् ।

कर्तरि धर्षयति-ते । धर्षति । अदीधृषत् अदधर्षत् । अधर्षीत् । धर्षयितास्मि-से धर्षितास्मि । धर्षयिष्यति-ते धर्षिष्यति । कर्मणि धर्ष्यते धृष्यते । अधर्षि ।

कृत्सु धर्षयिता । धर्षणा । धर्षयितुम् धर्षयितव्यम् । धर्षयित्वा । संधर्ष्य । धर्षः । धर्षयन् माणः धर्षयमाणः । धर्षयि-यन् यमाणः । अन्यत् स्वादिगणीयवत् ।

Digitized by Google

धे पाने भ्वादिगणीयः परस्मैपदी सकर्मकः अनिट्।

कर्तरि धयति। धयेत्। धयतु। अधयत्। अदधत् अधात् अधासीत्। दधौ। धाता। धेयात्।

कर्मणि धीयते। अधायि। णिचि धापयति-ते। अदीधपत्-त। सनि धित्सति। यङि देधीयते।

कृत्सु धानीयम्। धानम्। धायः। धायकः। स्तनन्धयः। स्तनन्धयी। पुष्पन्धयः। धायी। धाता। धितः। धितिः। धातुम्। धातव्यम्। धित्वा। संधाय। धेयम्। धयन् धीयमानः। धा-स्यन् स्यमानः।

ध्वन रवे भ्वादिगणीयः पर० अक० सेट्।

कर्तरि ध्वनति। अध्वानीत् अध्वनीत्। दध्वान। भावे ध्वन्यते। अध्वानि। णिचि ध्वनयति-ते ध्वानयति-ते। अदिध्वनत्। कर्मणि ध्वन्यते। अध्वानि-अध्वनि।

कृत्सु ध्वननीयम्। ध्वननम्। ध्वानः। ध्वानकः। ध्वनिः। ध्वनिता। ध्वनितः। ध्वनितुम्। ध्वनितव्यम् ध्वनित्वा। सन्ध्वन्य। ध्वन्यः। ध्वनन् ध्वन्यमानः। ध्वनिष्यन् ष्यमाणः।

ध्वन शब्दे अदन्तचुरादि उभयपदी० अकर्मकः सेट्।

कर्तरि ध्वनयति-ते। अदिध्वनत् अध्वनयीत्। ध्वनयिता। भावे ध्वन्यते। अध्वनि।

कृत्सु ध्वनयिता। ध्वनयितुम्। ध्वनयितव्यम्। ध्वनयन् मानः ध्वनयि-ष्यन् ष्यमाणः। अन्यत् भ्वादिगणीयवत्।

Digitized by Google

ध्वन्स गतौ नाशे च भ्वादिगणीयः आत्मनेपदी
गतौ सक० नाशे अक० सेट्।

कर्तरि ध्वंसते। अध्वंसिष्ट। दध्वंसे दध्वसे। ध्वस्यात्। कर्मणि भावे च ध्वस्यते। अध्वंसि। णिचि ध्वंसयति-ते। अदध्वंसत्-त।

कृत्सु ध्वंसनीयम्। ध्वंसनम्। ध्वंसः। ध्वंसकः। ध्वंसी। ध्वसिता। ध्वस्तः। ध्वस्तिः। ध्वंसितुम्। ध्वंसितव्यम्। ध्वसित्वा ध्वस्त्वा। अपध्वस्य। ध्वंस्यः। ध्वंसमानः। ध्वंसिषमाणः।

ध्मा सुखमारुतसंयोजने शब्दे च भ्वादिगणीय
परः सक० शब्दे अक० सेट्।

कर्तरि धमति। धमेत्। धमतु। अधमत्। अध्मासीत्। दध्मौ दध्मतुः दध्माथ-दध्मिथ। ध्मेयात् ध्मायात्। कर्मणि ध्मायते। अध्मायि। णिचि ध्मापयति-ते। अदिध्मपत्-त।

कृत्सु ध्मानीयम्। ध्मानम्। ध्मायः। नाड़ीध्मः। ध्मायकः। ध्मायी। ध्मातः। ध्मातिः। ध्मातुम्। ध्मातव्यम्। ध्मात्वा। संध्माय। ध्मेयम् धमन् ध्मायमानः ध्मास्यन् ध्मास्यमानः। कर्मणि ध्मायिषमाणश्च। आ—स्फीततायाम्। आधमति उदरम् स्फायते। उदरस्याध्मानम्।

ध्यै चिन्तायां भ्वादिगणीयः परः सक० अनिट्।

कर्तरि ध्यायति। ध्यायेत्। ध्यायतु। अध्यायत्। अध्यासीत्। दध्यौ। ध्याता। ध्येयात् ध्यायात्। कर्मणि ध्यायते। अध्यायि। णिचि ध्यापयति-ते। अदिध्यपत्-त।

Digitized by Google

कृत्सु ध्यानीयम्। ध्यानम्। ध्यायः। ध्यायकः। ध्यायी। ध्याता। ध्यातः। ध्यातिः। ध्यातुम्। ध्यातव्यम्। ध्यात्वा। संध्याय। ध्येयम्। ध्यायन् ध्यायमानः। ध्यास्यमानः ध्यायिष्यमाणश्च। क्विप् धीः। यद्यपि वृतनटनन्दनक्नाधनाथभिक्षाः स्वर्वे नकारादयो धातवः गणपाठे णकारादिकतया पठितास्तथापि प्रयोगकाले ते नकारादेशेन नादयो भवन्ति पुनश्च त एव प्रादिपूर्व्वकाः णत्वादेशेन णादयो भवन्ति। अतोऽत्र प्रयोगानुसारेण नादय एव प्रदर्श्यन्ते।

नट अवस्रन्दने (हिंसने) चुरादिगणीयः उभयपदी सकर्म्मकः सेट्। प्रायेणायमुत्पूर्व्वकः।

कर्तरि उन्नाटयति-ते। उदनीनटत्-त। कर्म्मणि उन्नाट्यते। उदनाटि।

कृत्सु उन्नाटनीयम् उन्नाटनम्। उन्नाटकः। उन्नाटयिता। उन्नाटितः। उन्नाटना। उन्नाटयितुम्। उन्नाटयितव्यम्। नाटयित्वा उन्नाट्य। उन्नाट्यम्। उन्नाटय-न मानः उन्नाट्यमानः। उन्नाटयिष्यन् ष्यमाणः। उन्नाटिष्यमाणश्च। णोपदेशाभावेन नास्य णत्वम् प्रनटति।

नट नृत्ये भ्वादिगणीयः परस्मैपदी अकर्म्मकः सेट्।

कर्तरि नटति अनाटीत् अनटीत्। ननाट नेटतुः। भावे नट्यते। अनाटि। णिचि नाटयति। घटादेषु नटयति-ते। कर्म्मणि अनाटि अनटि।

Digitized by Google

कृत्सु नटनीयम् । नटनम् । नाटः । नाटकः । नाटी । नटिता । नटितः । नटितुम् । नटितव्यम् । नटित्वा । संनट्य । नाट्यम् । नटन् नटिष्यन् । अस्य णोपदेशतया णत्वम् प्रणटति ।

नद शब्दे भ्वादिगणीयः परस्मैपदी अकर्मकः सेट् ।

कर्तरि नदति । अनादीत् अनदीत् । ननाद नेदतुः । भावे नद्यते । अनादि ।

णिचि नादयति-ते । अनीनदत्-त ।

कृत्सु नदनीयम् । नदनम् । नादः । नादकः । नादी । नदिता । नदितः । नदितुम् । नदितव्यम् । नदित्वा । संनद्य । नाद्यम् । नदन् नदिष्यन् । प्रणिनदति ।

प्र-परि-परा-निर्-अन्तर्-पूर्वकस्य णत्वं प्रणदति परिणदति पराणदति । निर्णादः अन्तर्णदनम् ।

नन्द आनन्दे भ्वादिगणीयः परस्मैपदी अकर्मकः सेट् ।

कर्तरि नन्दति । अनन्दीत् । ननन्द दनन्दतुः । नन्द्यात् । भावे नन्द्यते । णिचि नन्दयति-ते । अननन्दत् ।

कृत्सु नन्दनीयम् । नन्दनम् । नन्दः । ण्वुल्तृचौ ल्यु-नन्दनः । अथुच्-नन्दथुः । नन्दकः आनन्दी । नन्दिता । नन्दितः । नन्दा । नन्दितुम् । नन्दितव्यम् । नन्दित्वा । संनन्द्य । नन्द्यः । नन्दन् नन्दिष्यन् । प्रादिपूर्वस्य न णत्वम् । प्रनन्दतीत्यादि । अभि-अभिनन्दने अभिनन्दति संवर्धयति ।

Digitized by Google

नम नमने भ्वादिगणीयः परस्मैपदी सकर्मकः अनिट्।

कर्तरि नमति। अनंसीत् अनंसिष्टाम्। ननाम नेमतुः। नन्ता नंस्यति। कर्मणि नम्यते। अनामि। णिचि नमयति-ते। अनीनमत्-त। कर्मणि अनामि अनमि। सनि निनंसति यङि नंनम्यते।

कृत्सु नमनीयम्। नमनम्। नमः। नामकः। नामी। नन्ता। नतः। नतिः। नन्तुम्। नन्तव्यम्। नत्वा। सन्नम्य सन्नत्य। नम्यम् र-नम्रः नमन् नम्यमानः। यङः नंनम्यमानः। नं-स्यम् स्यमानः। आदिभ्यो यातम्। प्रणमति। प्रणामः। परि-परिणामे आत्म० परिणमते।

नर्द शब्दे भ्वादिगणीयः परस्मैपदी अकर्मकः सेट्।

कर्तरि नर्दति। अनर्दीत्। ननर्द ननर्दतुः। नर्दिता। भावे नर्द्यते। अनर्दि। णिचि नर्दयति-ते। अननर्दत्-त।

कृत्सु नर्दनीयम्। नर्दनम्। नर्दकः। नर्दी। नर्दिता। नर्दितः। नर्दा। नर्दितुम्। नर्दितव्यम्। नर्दित्वा। संनर्द्य। नर्दम्। नर्दन् नर्दिष्यन्। प्रणर्दति परिणर्दनम्।

नश नाशे अदर्शने च दिवादिगणीयः परस्मैपदी अकर्मकः वेट्।

कर्तरि नश्यति। अनेशत् अनशत्। ननाश नेशतुः। नशिता नंष्टा नङ्क्ष्धा। नश्यात्। नशिष्यति नङ्क्ष्यति। भावे

Digitized by Google

नश्यते। अनाशि। णिचि परस्मैपदी नाशयति। अनीनशत्। सनि निनशिषति। निनङ्क्षति।

कृत्सु नशनीयम्। नशनम्। नाशः। नाशकः। नाशी। नशिता नंष्टा नङ्क्ष्धा। नष्टः नग्धः। नष्टिः नग्धिः। नशितुम् नंष्टुम् नङ्क्ष्धुम्। नशितव्यम् नंष्टव्यम् नङ्क्ष्धव्यम्। नशित्वा नष्ट्वा नग्ध्वा। विनश्य। नाश्यम्। नश्यन् नशिष्यन् नङ्क्ष्यन्। प्रादिभ्यः शकारस्याधिकृतिस्थले णत्वं प्रणश्यति अन्यत्र विकारे तु न, प्रनष्टः प्रनग्धः।

नह बन्धने दिवादिगणीयः उभयपदी सकर्मकः अनिट्।

कर्तरि नह्यति-ते। अनात्सीत् अनद्ध। ननाह नेहतुः नेहे। नद्धा-सि से। कर्मणि नह्यते अनाहि। णिचि नाहयति अनीनहत्।

कृत्सु नहनीयम्। नहनम्। नाहः। नाहकः। नद्धा। नद्धः। नद्धिः। नद्धुम्। नद्धव्यम्। नद्धा। संनह्य। नाह्यम्। नह्य-न् मानः। नत्-स्यन् स्यमानः। प्रादिभ्यो णत्वं प्रणह्यति। प्रणद्धः। सम्-कवचधारणे अकर्मकः संनह्यति-ते परि—परिणाहे (विशालतायाम्) अक० परिणह्यति।

नाथ आशीर्वादे प्रार्थने च आत्मनेपदी प्रार्थने पर० द्विक० आशीर्वादे सक० सेट्।

कर्तरि नाथते। अनाथिष्ट। ननाथे। कर्मणि नाथ्यते अनाथि। णिचि नाथयति-ते अननाथत्-त।

कृत्सु नाथनीयम्। नाथनम्। नाथः। नाथकः। नाथी।

Digitized by Google

नाथितः नाथा। नाथितुम्। नाथितव्यम्। नाथित्वा। संनाथ्य। नाथम्। नाथमानः नाथ्यमानः। नाथिष्यमाणः। अस्य न णत्वम् प्रनाथते।

निज शोधने जुहोत्यादि० उभयपदी सक० अनिट्।

कर्तरि नेनेक्ति नेनिक्तः नेनिजति नेनेक्षि नेनिक्थः नेनिक्थ नेनेज्मि नेनिज्वः नेनिज्मः नेनिक्ते नेनिजाते नेनिजते नेनिक्षे। नेनिज्यात् नेनिजीत। नेनेक्तु नेनिग्धि नेनिजानि। अनेनेक्-ग् अनेनिक्त। अनिजत्-अनैक्षीत्, अनिक्त। निनेज निनिजे। नेक्ता-क्षि-क्षे। निज्यात् निक्षीष्ट। नेक्ष्य-ति-ते। कर्मणि निज्यते अनेजि। णिचि नेजयति-ते। अनीनिज-त्-त। सनि निनिक्ष-ति-ते। यङि नेनिज्यते। प्रादिभ्यो णत्वम् प्रणेनेक्ति।

कृत्सु नेजनीयम्। नेजनम्। नेजः नेजकः। नेजी। नेक्ता। निक्तः। निक्तिः। नेक्तुम्। नेक्तव्यम्। निक्त्वा। विनिज्य। नेज्यम्। नेनिजत्। नेनिजानः। ने-क्ष्नृ क्ष्यमाणः।

निन्द निन्दायां भ्वादिगणीयः पर० सकर्मकः सेट्।

कर्तरि निन्दति। निन्देत्। निन्दतु। अनिन्दत्। अनिन्दीत्। निनिन्द निनिन्दतुः। निन्द्यात्। निन्दिष्यति। कर्मणि निन्द्यते। अनिन्दि। णिचि निन्दय-ति-ते। अनिनिन्द-त्-त।

कृत्सु निन्दनीयम्। निन्दनम्। निन्दकः। निन्दी।

Digitized by Google

निन्दिता। निन्दितः। निन्दा। निन्दितुम्। निन्दितव्यम्। निन्दित्वा। संनिन्द्य। निन्द्यम्। निन्दन् निन्द्यमानः। निन्दिष्यन् निन्दिष्यमाणः। प्रादिभ्यो णत्वम् प्रणिन्दति।

कृत्सु पाणिनीयमते वा णत्वं प्रणिन्दा प्रनिन्दा मुग्धबोधमते तु सर्वत्र वा णत्वम्।

नी प्रापणे भ्वादिगणीयः उभयपदी द्विकर्मकः अनिट्।

कर्तरि नयति नयतः नयन्ति नयसे। नयेत् नयेत। नयतु नयताम्। अनयत् अनयत। अनैषीत् अनेष्ट। निनाय निन्ये। नेता-सि-से। नीयात् नेषीष्ट। नेष्य-ति-ते। कर्मणि नीयते। अनायि। णिचि नाययति-ते। अनीनय-त्-त। सनि निनीषति-ते। यङि नेनीयते।

कृत्सु नयनीयम्। नयनम्। नयः। उपनयः विनयः। उन्नायः। सन्नायः आनायः। नायकः। नायी। नेता। नीतः। नीतिः। नेतव्यम्। नीत्वा। विनीय। नेयम्। नयन् नयमानः नीयमानः। नेष्यन् नेष्यमाणः। कर्मणि नायिष्यमाणश्च। प्रादिभ्यो णत्वम् प्रणयति। प्रणयः।

प्र—करणे प्रणयति करोति। अप-दूरीकरणे अपनयति। उप-उपनयने आत्मनेपदम् उपनयते। उत्-उन्नयने (उत्प्रेक्षायाम् आक्षेपणे च) उन्नयति उत्प्रेक्षते आक्षिपत्यर्थे आत्म० वा अभि—अभिनये (आकारादिना तदनुरूपकरणे) अभिनयति। अनु-अनुनये (सन्तोषादिजनकव्यापारकरणे) अनुनयति। वि—विनये

आत्मनेपदी विनयते। वि-विगणने च (ऋणशोधनार्थ-गणनायाम्) आत्मनेपदी ऋणं विनयते शोधनार्थं गणयतीत्यर्थः।

णु स्तुतौ अदादि० परस्मैपदी सक० वेट्।

कर्तरि नौति नुतः नुवन्ति नौषि नुथः नुथ। नौमि। नुयात्। नौतु नवानि नवाव नवाम। अनौत् अनावीत्-अनौषीत्। नुनाव नुनुविथ नुनुविव। नविता-नोता। नविष्यति-नोष्यति। कर्मणि नूयते। अनावि। णिचि नावयति-ते। अनूनव-त्-त। सनि नुनूषति। यङि नोनूयते।

कृत्सु नवनीयम्। नवनम्। नवः अभिनवः। नावकः। नावी नविता-नोता। नुतः। नुतिः। नवितुम् नोतुम्। नवितव्यम्-नोतव्यम्। नवित्वा-नुत्वा। संनुत्य। नव्यम् नाव्यम्। नुवन् नूयमानः। नविष्यन्-नोष्यन्। नविष्यमाणः, नोष्यमाणः कर्मणि नाविष्यमाणश्च। प्रादिभ्यो णवम् प्रणौति प्रणवः।

णुद प्रेरणे तुदादिगणीयः उभयपदी सकर्मकः अनिट्।

कर्तरि नुद-ति-ते। नुदे-त्-त। नुद-तु ताम्। अनुद-त्-त। अनौत्सीत् अनुत्त। नुनोद नुनोदिथ नुनुदिव नुनुदे। नोत्ता-त्सि से। नुद्यात् नुत्सीष्ट। नोत्स्य ति-ते। कर्मणि नुद्यते। अनोदि। णिचि नोदय-ति-ते। अनूनुद-त्-त। सनि नुनुत्स ति-ते। यङि नोनुद्यते।

कृत्सु नोदनीयम्। नोदनम्। नोदः विनोदः। नोदकः।

Digitized by Google

नोदी विनोदी। नुन्नः नुन्नवान्। नुत्तिः। नोत्तुम्। नोतव्यम्। नुत्त्वा। संनुद्य। नोद्यम्। नुद-न् मानः नुद्यमानः नोत्-स्यन् स्यमानः। प्रादिभ्यो णत्वम् प्रणुदति। प्रणोदनम्। वि-विनोदे (हर्षहेतुकव्यापारे) सकर्मकः। विनुदति। विनोदः। णिचि हर्षसम्पादने व्यापारे विनोदयति। अप-अपसारणे खण्डने च अपनुदति।

मू स्तवने तुदादिगणीयः परस्मैपदी सकर्मकः सेट्।

कर्तरि नुवति नुवतः नुवन्ति। नुवेत्। नुवतु। अनुवत्। अनुवीत् अनुविष्टाम्। नुनाव नुनुवतुः नुनुविथ। नुविता। नुविष्यति। कर्मणि नूयते। अनावि। णिचि नावयति-ते। अनूनव-त्-त। सनि नुनूषति। यङि नोनूयते।

कृत्सु नुवनीयम्। नुवनम्। नुवः। नावकः। नुविता। नूतः। नूतिः। नुवितुम्। नुवितव्यम्। नुवित्वा। संनूय। नूयं नाव्यम्। नुवन् नुवमानः नूयमानः। नुविष्यन् ष्यमाणः। कर्मणि नाविष्यमाणश्च। प्रादिभ्यो णत्वम् प्रणुवति। प्रणूतः।

नृत नर्त्तने दिवादिगणीयः परस्मैपदी अकर्मकः सेट्।

कर्तरि नृत्यति नृत्यतः नृत्यन्ति। अनर्त्तीत्। ननर्त्त। नर्तिता। नृत्यात्। नर्त्तिष्यति नर्तस्यति। भावे नृत्यते। अनर्त्ति। णिचि नर्तय-ति-ते। अनीनृतत् अननर्तत्। सनि निनर्तिषति निनृत्सति।

Digitized by Google

कृत्सु नर्तनीयम्। नर्तनम्। नर्तः। नर्तकः नर्तकी। नर्त्तौ। नर्तिता। नृत्तः। नृत्तिः। नर्तितुम्। नर्तितव्यम्। नर्तित्वा। संनृत्य। नृत्यं नर्त्यम्। नृत्यन्। नर्तित्यन्। नर्त्स्यन्। प्रादिभ्यो न णत्वम् प्रनृत्यति।

पच पाके भ्वादिगणीयः उभयपदी सकर्मकः अनिट्।

कर्तरि पचति-ते। पचेत्-त। पच-तु-ताम्। अपच-त्-त। अपाक्षीत् अपक्त। पपाच। पेचतुः पेचिथ-पपक्थ पेचिव पेचे। पक्ता-सि-से। पक्ष्यात् पक्षीष्ट। पक्ष्य-ति-ते। कर्मणि पच्यते अपाचि। णिचि पाचय-ति-ते। अपीपच-त्-त। सनि पिपक्ष-ति-ते। यङि पापच्यते।

कृत्सु पचनीयम्। पचनम्। पाकः। स्तम्पचः द्रोणम्पचः। पचः। सुपचः दुष्पचः। पाचकः। दृषाद्भ्य उत्पचिष्णुः। एलिम पचेलिमम्। पक्ता। क्लिमप् च, पक्लिमः। पक्वः। पक्तिः। पचा। पक्तुम्। पक्तव्यम्। पक्त्वा संपच्य पाच्यम्। पच-न् मानः। पच्यमानः पच्य-न् माणः।

पच्च व्यक्तीकारे भ्वादिगणीयः आत्मनेपदी सकर्मकः सेट्।

कर्तरि पच्चते। अपच्चिष्ट। कर्मणि पच्यते। अपच्चि। णिचि पच्चय-ति-ते। अपपच्च-त्त।

कृत्सु पच्चनीयम्। प्रपच्चनम्। पच्चः पच्चकः पच्चितम्। पच्चितुम्। पच्चिः। पच्चितव्यम्। पच्चिता। पच्चमानः पच्चिष्यमाणः।

Digitized by Google

पच्च विस्तारे चुरादिगणीयः उभयपदी सकर्मकः सेट्।

कर्तरि पचय-ति-ते। अपपच्च-त्-त। कर्मणि पच्यते। अपच्चि।

कृत्सु। पचयिता। पचना। पचयितुम्। पचयितव्यम्। पचयित्वा। पचय-न् मानः पचमानः। पचयि-यन् यमाणः इत्यादि भेदः अन्यत् भ्वादिगणीयवत्।

पट भ्रंशने चुरादिगणीयः उभयपदी सक० सेट्।

कर्त्तरि पाटय-ति-ते। अपीपट त्-त। कर्मणि पाट्यते। अपाटि।

कृत्सु पाटनीम् पाटनम्। पाटकः। पाटी। पाटयिता। पाटितः। पाटना पाटयितुम्। पाटयितव्यम्। पाटयित्वा। संपाट्य। पाट्यम्। पाटय-न् मानः पाट्यमानः। पाटयि-यन् यमाणः। कर्मणि पाटिष्यमाणश्च। उत्-उत्पाटने (उन्मूलने) उत्पाटयति मूलादुत्पाटयति।

पठ पठने भ्वादिगणीयः परस्मैपदी सक० सेट्।

कर्तरि पठति। अपाठीत् अपठीत्। पपाठ। पेठतुः। कर्मणि पठ्यते। अपाठि। णिचि। पाठय-ति-ते। अपीपठ-त्-त। सनि पिपठिषति। यङि पापठ्यते।

कृत्सु पठनीयम्। पठनम्। पाठः पाठकः। पाठी। पठिता। पठितः। पठितिः। पठितुम्। पठित्वा। सम्पठ्य। पाठ्यम्। पठन्। पठ्यमानः। पठि यन् यमाणः।

Digitized by Google

ण्यन्तस्य पाठनीयम्। पाठनम्। पाठयिता। पाठितः। पाठना। पाठयितुम्। पाठयितव्यम्। पाठयित्वा। पाठय-न् मानः पाठ्यमानः। पाठयि-ष्यन् ष्यमाणः। इति भेदः। सनः पिपठिषा पिपठिषुः। पिपठिषन्। क्विपि पिपठीः।

पण व्यवहारे स्तुतौ च भ्वादिगणीयः अनुनेपदी सेट्।

कर्त्तरि पणायते पणायति। अपणायिष्ट। अपणिष्ट। पणायाम्-बभूव-आस-चक्रे रेणे। पणायितासे पणितासे। स्तुतौ सार्वधातुकेऽपि वा आयः पणते इत्यादि। कर्मणि पणाय्यते पण्यते। अपणायि-अपाणि।

कृत्सु पणायनीयम्- पणनीयम्। पणायनम्-पणनम्। पणः। पणायकः-पाणकः। पणायिता-पणिता। पणायितः-पणितः। पणाया। पणायितुम् पणितुम्। पणायितव्यम्-पणितव्यम्। पणायित्वा पणित्वा। सम्पणाय्य-सम्पण्य। पणाय्यम् पाण्यम्। पणायमानः पणायन् स्तुतौ पणमानोऽपि पणायि-ष्यन् ष्यमाणः-पणिष्यमाणः।

पत पतने भ्वादिगणीयः परः अकः सेट्।

कर्त्तरि पतति। अपप्तत्। पपात पेततुः। पतिता पत्तारौ। पतिष्यति। भावे पत्यते। अपाति। णिचि पातय-ति-ते। अपीपत-त्-त। सनि पिपतिषति-पित्सति। यङि पनीपत्यते।

Digitized by Google

कृत्सु पतनीयम्। पतनम्। पातः। पातकः। पाती। दृणुच् उत्पतिष्णुः। उकञ् पातुकः। पतितः। पक्तिः। पतितुम्। पतितव्यम्। पतित्वा। सम्पत्य। पात्यम्। पतन् पतिष्यन्। ण्यन्तस्य पातनीयम्। पातनम्। पातयिता। पातितः। पातना। पातयितुम्। पातयितव्यम्। पातय-न् मानः पात्यमानः। पातयि-ष्यन् ष्यमाणः। कर्मणि पातिष्यमाणश्च। सनः पिपतिषा-पित्सा। पिपतिषुः-पित्सुः। पिपतिषन् पित्सन्।

उत् ऊर्द्धपतने उत्पतति। प्रनि नमस्कारे सक० प्रणिपतति। अनु अनुगमने अनुपतति।

पद गतौ दिवादिगणीयः आत्मनेपदी सकर्मकः अनिट्।

कर्तरि पद्यते। अपादि। पत्स्यते। कर्मणि पद्यते। अपादि। णिचि पादय-ति-ते अपीपद-त्-त। सनि पिपदिषते पित्सते। यङि पनीपद्यते। प्रनि-प्रणिपद्यते।

कृत्सु पदनीयम्। पदनम्। पादः। पादी। पादकः। पन्नः। पक्तिः। पत्तुम्। पत्तव्यम्। पत्त्वा। प्रपद्य। पाद्यम्। पद्यमानः। पत्स्यमानः। ण्यन्तस्य पादनीयम् पादनम्। पादयिता। पादितः। पादना। पादयितुम्। पादयितव्यम्। पादयित्वा। पादय-न् मानः पाद्यमानः। पादयि ष्यन् ष्यमाणः। कर्मणि पादिष्यमाणश्च। सनः पिपदिषा पित्सा पिपदिषुः पित्सुः। पिपदिषमाणः-पित्समानः। यङि पनीपद्यमानः।

Digitized by Google

उत् उद्भवे अक० उत्पद्यते। उदपादि। उत्पन्नः। उत्पत्तिः।

सम् सम्पत्तौ अक० सम्पद्यते। सम्पन्नः सम्पत्तिः-सम्पत्।

वि मरणे अक० विपद्यते। विपन्नः विपत्तिः विपत्।

आ आपत्तौ (आपत्प्राप्तौ, हठादागमने, तर्कविशेषे च) आपद्यते आपदं प्राप्नोति हठादागच्छति तर्कविषयीभवति। आपन्नः आपत्तिः-आपत्। प्रति ज्ञाने, स्वीकारे, वा प्रतिपद्यते जानाति स्वीकरोति वा। उप उपपत्तौ (युक्तियुक्तभवने)। उपपद्यते। उपपन्नः उपपत्तिः। णिचः उपपादयति। उपपाद्यते। उपपादनीयम्। उपपाद्यम्।

अभि उप-स्वीकारे अभ्युपपद्यते स्वीकरोति। अभ्युपपन्नः अभ्युपपत्तिः।

पा पाने भ्वादिगणीयः सक० अनिट्।

कर्तरि पिबति। पिबेत्। पिबतु। अपिबत्। अपात्। पपौ पपिथ-पपाथ पपिव। पाता। पेयात्। कर्मणि पीयते। अपायि अपायिषाताम्-आपासाताम्। पपे। पायिताखे पातासे। णिचि पाययति-ते। अपीप्य-त्-त। पिपासति। यङि पेपीयते।

कृत्सु पानीयम्। पानम्। पायः। पायकः। मधुपः द्विपः फेनपः। क्षीरपायी। पाता। पीतः। पीतिः। पातुम्। पातव्यम्। पीत्वा। आपाय। निपीयेति तु पीङोरूपम्।

Digitized by Google

पेयम् । पिबन् । पीयमानः । पास्यन् पास्यमानः । सन्: पिपासा । पिपासुः । पिपासन् ।

पा रक्षणे अदादिगणीयः परस्मैपदी सक० अनिट् ।

कर्तरि पाति । पायात् । पातु । अपात् अपाद्-अपुः । अपासीत् । पपौ पपुः । कर्मणि पायते । अपायि । णिचि पालय-ति-ते । अपीपल-त्-त ।

कृत्सु पिबतेरिव रूपम् । पातः । पातिः । प्रात्वा । पान् इत्यादि भेदः ।

पार कर्मसमाप्तौ अदन्तचुरादिगणीयः उभयपदी सक० सेट् ।

कर्तरि पारयति-ते । अपपारत्-त । कर्मणि पार्यते । अपारि ।

कृत्सु पारणीयम् । पारणम् । पारः । पारकः । पारयिता । पारितः । पारणा । पारयितुम् । पारयितव्यः । पारयित्वा । सम्पार्य । पार्यम् । पारय-न् माणः पार्यमाणः । पारयि-ष्यन् ष्यमाणः । कर्मणि पारिष्यमाणश्च ।

पाल रक्षणे चुरादिगणीयः उभयपदी सक० सेट् ।

कर्तरि पालय-ति-ते । अपीपल-त्-त । पालयिता-सि-से । कर्मणि पाल्यते । अपालि ।

कृत्सु पालनीयम् । पालनम् । पालः । अण् क्षेत्रपालः भूमिपालः भूपालः । पालकः । पालयिता । पालितः । पालना । पालयितुम् । पालयितव्यम् । पालयित्वा ।

Digitized by Google

सम्पाल्य। पाल्यः। पालय-न् मानः पाल्यमानः। पालयि-श्यन् श्यमाणः कर्मणि पालिश्यमाणश्च।

पिष पेषणे रुधादिगणीयः परस्मैपदी सक० अनिट्।

कर्तरि पिनष्टि पिंषः पिंषन्ति पिनक्षि पिंक्षः पिंक्ष पिनष्मि पिंष्वः पिंष्मः। पिंष्यात्। पिनष्टु। पिण्ड्ढि। अपिनट्-ड् अपिष्टाम्। अपिषत्। पिपेष। पिपेषिथ पिपेषिव। पेष्टा। पिष्यात्। पेक्ष्यति। कर्मणि पिष्यते। अपेषि। णिचि पेषय-ति-ते। सनि पिपिक्षति।

कृत्सु पेषणीयम्। पेषणम्। पेषः। पेषकः। पेषी। पेष्टा। पिष्टः। पिष्टिः। पेष्टुम्। पेष्टव्यम्। पिष्ट्वा। सम्पिष्य। णमुल् शुष्कपेषं पिनष्टि। पेष्यम्। पिंषन्। पिष्यमाणः। पे-श्यन् श्यमाणः।

पीड़ पीड़ने चुरादिगणीयः उभयपदी सक० सेट्।

कर्तरि पीड़य-ति-ते। अपीपिड़-त्-त-अपिपीड़-त्-त। कर्मणि पीड़्यते। कृत्सु पीड़नीयम्। पीड़नम्। पीड़ः। पीड़कः। पीड़ी। पीड़यिता। पीड़ितः। पीड़ा। णिजन्तस्य, पीड़ना। पीड़यितुम्। पीड़यितव्यम्। पीड़यित्वा। संपीड्य। पीड्यः। पीड़य-न् मानः पीड्यमानः। पीड़यि-श्यन् श्यमाणः। कर्मणि पीड़िश्यमाणश्च। आभूषणे आपीड़यति। आपीड़ा।

Digitized by Google

पुष पोषणे दिवादिगणीयः परस्मैपदी सक० अनिट्।

कर्तरि पुष्यति। पुष्येत्। पुष्यतु। अपुष्यत्। अपुषत्। पुपोष। पुपोषिथ पुपुषिव। पोष्टा। पोष्यते। कर्मणि पुष्यते। अपोषि। णिचि पोषयति-ते। अपूपुषत्। सनि पुपुक्षति।

कृत्सु पोषणीयम्। पोषणम्। पोषः। पोषकः। पोषी। पोष्टा। पुष्टः। पुष्टिः। पोष्टुम्। पोष्टव्यम्। पुष्ट्वा। सम्पुष्य। पोष्यम्। पुष्यन्। पुष्यमाणः। पोक्ष्यन्। क्ष्यमाणः।

पुष पोषणे क्र्यादिगणीयः परस्मैपदी सकर्मकः सेट्।

कर्तरि पुष्णाति। पुष्णीतः। पुष्णन्ति। पुष्णीयात्। पुष्णातु। अपुष्णात्। अपोषीत्। पोषिता। पोषिष्यति। कर्मणि पुष्यते। अपोषि। णिचि पोषय-ति-ते। अपूपुष-त्-त।

कृत्सु दिवादिगणीयवत् पोषिता। पोषितुम्। पोषितव्यम्। पोषित्वा। पुष्णन्। इत्यादि भेदः।

पुष्प विकाशे दिवादिगणीयः परस्मैपदी अक० सेट्।

कर्तरि पुष्यति अपुष्पीत्। भावे। पुष्यते। अपुष्पि। णिचि पुष्पय-ति-ते।

कृत्सु पुष्पणीयम्। पुष्पणम्। अच् पुष्पम्। पुष्पिता। पुष्पितः। पुष्पा। पुष्पितुम्। पुष्पितव्यम्। पुष्पित्वा। सम्पुष्प्य। पुष्पान्। पुष्पिष्यन्।

Digitized by Google

पू शोधने भ्वादिगणीयः आत्मनेपदी सक० सेट्।

कर्तरि पवते। अपावीत्। कर्मणि पूयते। अपावि। णिचि पावय-ति-ते। अपीपव-त्-त। सनि पुपूषते। णिचः सनि पिपावयिषति।

क्तत्सु पवनीयम्। ल्यु पवनः। पावकः। पविता। पूतः-पवितः। पूतिः। पवितुम्। पवितव्यम्। पवित्वा पूत्वा। सम्पूय। विपूय। पव्यम् पाव्यम्। पवमानः पूयमानः। पवि-ष्यन् ष्यमाणः। कर्मणि पाविष्यमाणश्च।

पू शोधे दिवादिगणीयः आत्मनेपदी अक० सेट्।

कर्तरि पूयते। अपविष्ट। पुपुवे। भावे पूयते। अपावि।
क्तत्सु भ्वादिगणीयवत्। पूयमान इति भेदः।

पू शोधने क्र्यादिगणीयः उभयपदी सक०
सार्वधातुके ह्रस्वः सेट्।

कर्तरि पुनाति पुनीतः पुनन्ति पुनीते। पुनीयात् पुनीत। पुनातु पुनीताम्। अपुनात् अपुनीत। अपावीत् अपविष्ट। पुपाव पुपुवे। पवितासि-से। पूयात् पविषीष्ट। पविष्य-ति-ते। अन्यत् भ्वादिगणीयवत्। निष्ठायां नाशेऽर्थे पूनः अन्यत्र पूतः। दूत्र पवित्रम्। शतरि पुनन् पुनानः इति भेदः।

Digitized by Google

पूज पूजने चुरादिगणीयः उभयपदी सक० सेट् ।

कर्तरि पूजय-ति-ते । अपूपुजत्-त । कर्मणि पूज्यते । अपूजि अपूजयिषाताम्-अपूजिषाताम् ।

कृत्सु पूजनीयम् । पूजनम् । पूजकः । पूजी । पूजयिता । पूजितः । पूजा । पुनर्णयन्तस्य पूजना । पूजयितुम् पूजयितव्यम् । पूजयित्वा सम्पूज्य । पूज्यः । पूजय-न् मानः पूज्यमानः पूजयि-यन् यमाणः । कर्मणि पूजिष्यमाणश्च ।

पूर पूर्त्तौ दिवादिगणीयः आत्मनेपदी सक० सेट् ।

कर्तरि पूर्यते । अपूरि-अपूरिष्ट । पुपूरे । पूरिता । कर्मणि पूर्यते । अपूरि । णिचि पूरय-ति-ते । अपूपुर-त्-त ।

कृत्सु पूरणीयम् । पूरणम् । पूरः । पूरकः । पूरी पूरिता । पूर्णः पूर्त्तं खातादि । पूर्त्तिः । पूरितुम् । पूरितव्यम् । पूरित्वा । सम्पूर्य । पूर्यम् । पूर्यमाणः । पूरिष्यमाणः ।

पूर पूर्त्तौ चुरादिगणीयः उभयपदी सक० सेट् ।

कर्तरि पूरयति-ते । अपूपुरत्-त । पूरयिता । कर्मणि पूर्यते । अपूरि । अपूरिषाताम् । अपूरयिषाताम् ।

कृत्सु पूरयिता । पूर्णः-पूरितः । पूरणा । पूरयितुम् । पूरयितव्यम् । पूरयित्वा । पूरय-न् माणः । पूरयि-यन् यमाणः इत्यादि भेदः । अन्यत् दिवादिगणीयवत् ।

Digitized by Google

पॄ पूरणे जुहोत्यादिः सकः परस्मैपदी अनिट् वा दीर्घः दीर्घपक्षे सेट्।

कर्तरि पिपर्त्ति पिपृतः-पिपूर्त्तः पिप्रति-पिपुरति पिपर्षि पिपृथः- पिपूर्थः पिपर्मि पिपृवः-पिपूर्वः। पिपूयात् पिपूर्य्यात्। पिपर्तु पिपृतात्-पिपूर्त्तात्। पिपृहि पिपूर्हि पिपराणि पिपराव। अपिपः अपिपृतात्-अपिपूर्त्तात् अपिपरुः। अपारीत् अपार्षीत्। पपार पपरतुः-पप्रतुः। परीता परिता। पर्त्ता। प्रियात् पीर्य्यात्। परिषीष्ट पृषीष्ट। परीर्य्यति। परिष्यति। कर्मणि प्रियते पूर्य्यते। अपारि। पारितासे परीतासे परितासे पर्त्तासे। णिचि पारयति-ते। सनि पिपरीषति पिपरिषति पुपूर्षति।

कृत्सु परणीयम् परणम्। परः पारः। पारकः। पारी। परीता परिता पर्त्ता। पूर्तः पृतः। पूर्तिः पृतिः। परीतुम् परितुं पर्तुम्। परीतव्यम् परितव्यम् पर्तव्यम्। पीर्त्वा पृत्वा। आपूर्य्य आपृत्य। पार्य्यम् पृत्यम्। पिपुरत् पिप्रत्। पूर्य्यमाणः प्रियमाणः। परीत्य-न् परिष्यन् परीष्यमाणः परिष्यमाणः। कर्मणि पारिष्यमाणश्च।

पॄ व्यापारे तुदादिगणीयः आत्मनेपदी सकर्मकः अनिट्। प्रायेण व्यापूर्वः।

कर्तरि व्यापिप्रियते। व्यापिप्रेत। व्यापिप्रियताम्। व्यापिप्रियत। व्यापृत। व्यापप्रे। व्यापृषीष्ट। व्यापरिष्यते। कर्मणि व्यापिप्रियते। व्यापारि। णिचि व्यापारय-र्त-ते। व्यापीपर-न्-त।

Digitized by Google

कृत्सु व्यापरणीयम्। व्यापरणम्। व्यापारः व्यापारकः। व्यापारी। व्यापर्त्ता। व्यापृतः। व्यापृतिः। व्यापर्तुम्। व्यापर्तव्यम्। व्यापृत्य। व्यापार्य्यः। व्यापरिष्यमाणः। व्यापरिष्यमाणः। कर्मणि व्यापारिष्यमाणश्च।

पॄ प्रीतौ स्वादिगणीयः परस्मैपदी अक०
प्रीणने सक० अनिट्।

कर्तरि पृणोति पृणतः पृणन्ति। पृणुयात्। पृणोतु। अपृणात्। अपार्षीत्। पपार पप्रतुः पप्रुः। प्रियात्। परिष्यति। कर्मणि प्रियते। अपारि अपारिषाताम्-अपृषाताम्। णिचि पारयति-ते अपीपरत्-त। सनि पुपूर्षति।

कृत्सु पृणन् इति भेदः अन्यत् तुदादिगणीयवत्।

पृच सम्पर्के रुधादिगणीयः पर० अक० सेट्।

कर्तरि पृणक्ति पृङ्क्तः पृञ्चति पृणक्षि पृङ्क्थः पृङ्क्थ पृणच्मि पृञ्वः पृञ्मः। पृञ्चात्। पृणक्तु। पृञ्जि। अपृणक्-ग्। अपर्चीत्। पपर्च। पर्चिता। भावे पृच्यते। अपर्चि।

कृत्सु पर्चनीयम्। पर्चनम्। पर्कः। विदुन् सम्पर्कौ। पर्चिता। पृक्तः। पृक्तिः। पर्चितुम्। पर्चितव्यम्। पर्चित्वा। संपृच्य। पर्क्यम्। पृञ्चन्। पर्चिष्यन्। क्विप् पृक।

Digitized by Google

पेस गतौ भ्वादिगणीयः परस्मैपदी सक० सेट्।

कर्तरि पेसति अपेसीत्। कर्मणि पेस्यते। अपेसि यिप्पि पेसयति-ते। अपिपेसत्-त।

कृत्सु पेसनीयम्। पेसनम्। पेसः। पेसकः। पेसी। पेसिता। पेसितः। पेसा। पेसितुम्। पेसितव्यम्। पेसित्वा। सम्पेस्य। पेस्यम्। पेसन् पेस्यमानः। पेसि-ष्यन्। ष्यमाणः।

पेस अनादरे चुरादिगणीयः उभयपदी सकं० सेट्।

कर्तरि पेपसयति-ते। अपीपिसत्-त।

कृत्सु पेसयिता। पेसयितुम्। पेसयितव्यम्। पेसयित्वा। पेसयन् मानः। पेसयिष्यन् ष्यमाणः इत्यादिभेदः अन्यत् भ्वादिगणीयवत्।

प्याय वृद्धौ भ्वादिगणीयः आत्मनेपदी अक० सेट्।

कर्तरि प्यायते। अप्यायि-अप्यायिष्ट। पिप्ये। भावे। प्याय्यते। अप्यायि। यङि पेपीयते।

कृत्सु प्यायनीयम् प्यायनम्। प्यायः। प्यायकः। प्यायी। प्यायिता। प्यानः। अपीनमूधः। प्यातिः। प्यायितुम्। प्यायितव्यम्। प्यायित्वा। संप्याय्य। प्याय्यम्। प्याय-मानः। प्यायिष्यमाणः। यङि पेपीयमानः। आ-णिच् प्रीणने आप्याययति-ते। आप्यायितः। आप्ययय-न् मानः।

Digitized by Google

प्रच्छ जिज्ञासायां तुदादिगणीयः द्विक० पर० अनिट् ।

कर्तरि पृच्छति । पृच्छेत् पृच्छतु । अपृच्छत् । अप्राक्षीत् । पप्रच्छ पप्रच्छतुः । प्रष्टा । पृक्ष्यात् । प्रक्ष्यति । कर्मणि । पृच्छ्यते । अपप्रच्छि । णिचि प्रच्छयति-ते । सनि पिपृच्छिषति ।

कृत्सु प्रच्छनीयम् । प्रच्छनम् । प्रच्छः । प्रच्छकः । प्रच्छी । प्रष्टा । पृष्टः । पृष्टिः । प्रष्टुम् । क्विप् प्राट् न प्रश्नः । प्रष्टव्यम् । पृष्ट्वा । आपृच्छ्य । प्रच्छ्यम् । पृ-च्छन् च्छ्यमानः । प्रच्छ-न् माणः । आ—आत्मनेपदं आपृच्छते । आपृष्टः ।

प्रथ ख्यातौ भ्वादिगणीयः आत्मनेपदी अकर्मकः
ख्यापने सकर्मकः सेट् ।

कर्तरि प्रथते । अप्रथिष्ट । पप्रथे । भावे प्रथ्यते । अप्राथि । णिचि प्रथय-ति-ते । अपप्रथ-त्-त । कर्मणि अप्राथि-अपथि ।

कृत्सु प्रथनीयम् । प्रथनम् । प्राथः । प्राथकः । प्राथी । प्रथिता प्रथितः । प्रथा । प्रथितुम् । प्रथितव्यम् । प्रथित्वा । संप्रथ्य प्राथ्यम् । प्रथमानः । प्रथ्यमानः । प्रथिष्यमाणः ।

प्री प्रीतौ दिवादिगणीयः आत्मनेपदी अकर्मकः
प्रीणने सक० अनिट् ।

कर्तरि प्रीयते । प्रीयेत । प्रीयताम् । अप्रीयत । अप्रेष्ट । पिप्रिये प्रेताम् । प्रेषीष्ट । प्रेष्यते । भावे प्रीयते । अप्रायि । णिचि प्रीणय-ति-ते । अपिप्रीण-त्-त ।

Digitized by Google

कृत्सु प्रयणीयम्। प्रयणम्। प्रायः। प्रायी। प्रेता। प्रीतः। प्रीतिः। प्रेतुम्। प्रेतव्यत्। प्रीत्वा। सम्प्रीय। प्रेयम्। प्रीयमाणः प्रेष्यमाणः।

प्री तृप्तिक्रयां क्रयादिगणीयः उभयपदी सकर्मकः अनिट्।

कर्तरि प्रीणाति प्रीणीतः प्रीणन्ति प्रीणीते प्रीणाते। प्रीणीयात् प्रीणीत। प्रीणातु प्रीणीताम्। अप्रीणात् अप्रीणीत। अप्रैषीत् अप्रेष्टः पिप्राय पिप्रियतुः पिप्रिये। प्रेता-स्रिसे। प्रीयात्। प्रेषीष्ट। प्रेष्यति-ते। कर्मणि प्रीयते। अप्रायि। णिचि प्रायय-ति ते। अपिप्रय-त्-त।
कृत्सु दिवादिगणीयवत्। प्रीणन् प्रीणान इत्यादि भेदः।

प्रु गमने भ्वादिगणीयः आत्मनेपदी सकर्मकः अनिट्।

कर्तरि प्रवते। अप्रोष्ट। पुप्रुवे। प्रोतासे प्रोष्यते। कर्मणि प्रूयते। अप्रावि। णिचि प्रावयति-ते। अपिप्रवत्-त-अपुप्रवत्-त्-त।
कृत्सु प्रवणीयम्। प्रवणम्। प्रावः प्रावकः। प्रावी। प्रोता। प्रुतः। प्रुतिः। प्रोतुम्। प्रुत्वा। सम्प्रुत्य। प्रव्यम्। प्रवमाणः प्रूयमाणः। प्रोष्यमाणः। कर्मणि प्राविष्यमाणश्च।

प्रुष दाहे भ्वादिगणीयः परस्मैपदी सकर्मकः सेट्।

कर्तरि प्रोषति। अप्रोषीत्। पुप्रोष। कर्मणि प्रुष्यते। अप्रोषि। णिचि। प्रोषय-ति-ते। अपुप्रुष-त्-त।

Digitized by Google

कृत्सु प्रोषणीयम् प्रोषणम्। प्रोषः। प्रोषकः। प्रोषी। प्रोषिता। प्रुष्टः। प्रुष्टिः। प्रोषितुम्। प्रोषितव्यम्। प्रोषित्वा। प्रुष्ट्वा। संप्रुष्य। प्रोष्यः। प्रोषन्। प्रुष्यमाणः। प्रोषि-ष्यन् ष्यमाणः।

प्लुव प्लवने भ्वादिगणीयः आत्मनेपदी अकर्मकः सेट्।

कर्तरि प्लवते। अप्लविष्ट। भावे प्लूयते। अप्लावि। णिचि प्लावयति-ते। अपिप्लव-त्-त।

कृत्सु प्लवनीयम्। प्लवनम् खलस्य प्लावनम्। प्लवः। विप्लवः-विप्लावः। आप्लवः-आप्लावः। प्लावकः। प्लविता। प्लवितः। प्लवितुम्। प्लवितव्यम्। प्लवित्वा। संप्लुत्य। प्लाव्यम्। प्लवमानः प्लविष्यमाणः।

प्लुष-दाहे भ्वादिगणीयः आत्म० सक० सेट्। प्लषद्वकार्द्धम्।

ग्लै भक्षणे अदादिगणीयः परस्मैपदी सक० अनिट्।

कर्तरि ग्लाति। ग्लातः। ग्लायात्। ग्लातु। अग्लात् अग्लुः-अग्लान्। अग्लासीत् अग्लासिष्टाम्। अग्लासिषुः। पक्षौ ग्लायात्-ग्लेयात्। कर्मणि ग्लायते। अग्लासि। णिचि ग्लापयति अपिप्लपत्।

कृत्सु। ग्लानीयम्। ग्लानम्। ग्लायः। ग्लायकः। ग्लायी। ग्लाता। ग्लातः। ग्लातिः। ग्लातुम्। ग्लातव्यम्। ग्लात्वा संग्लाय। ग्लेयम्। ग्लान् ग्लायमानः। ग्ला-स्यन् स्यमानः। कर्मणि ग्लाविष्यमाणश्च। प्रणिग्लाति। प्रणिग्ला।

Digitized by Google

फल गतौ निष्पत्तौ च भ्वादिगणीयः परः सकः सेट्।

कर्तरि फलति। अफालीत्। पफाल फेलतुः। कर्मणि फल्यते अफालि। णिचि फालय-ति-ते। गत्यर्थस्य तु फलयति। उभययोः अपीफल-त्-त।

कृत्सु फलनीयम् फलनम्। अच् फलम्। फालः। फालकः। फलिता। फुल्लः फुल्लवान्। प्रफुल्लः संफुल्लः। भावे फुल्लम्। क्रियारम्भे फल्लः। फुल्लिः। फलितुम्। फलितव्यम्। फलित्वा। संफल्य। फलन् फल्यमानः। फलिष्यन् ष्यमाणः।

फुल्ल विकासे भ्वादिगणीयः परः अकः सेट्।

कर्तरि फुल्लति। अफुल्लीत्। पुफुल्ल। फुल्लिता। भावे फुल्लते। अफुल्लि। फुल्लयति-ते। अपुफुल्लत्।

कृत्सु फुल्लनीयम्। फुल्लनम्। फुल्लः। उत्फुल्लः संफुल्लः प्रफुल्लः। फुल्लकः। फुल्लितः। फुल्लिः। फुल्लितुम्। फुल्लितव्यम्। संफुल्ल। फुल्लम्। फुल्लन् फुल्लिष्यन्।

वध निन्दायां भ्वादिगणीयः आत्मनेपदी सकः सेट्।

कर्तरि बीभत्सते। बीभत्सेत। बीभत्सताम्। अबीभत्सत। अबीभत्सिष्ट। बीभत्साम् बभूव आस-चक्रे। बीभत्सितासे। बीभत्सिषीष्ट। बीभत्सिषते। अबीभत्सिषत। कर्मणि। बीभत्स्यते। अबीभत्सि। णिचि बीभत्सयति-ते। अबीभत्सत्-त।

Digitized by Google

क्षत्सु। बीभत्सनीयम्। बीभत्सनम्। बीभत्सकः। बीभत्सिता। बीभत्सितः। बीभत्सा। बीभत्सुः। बीभत्सितुम्। बीभत्सितव्यम्। बीभत्सित्वा। आबीभत्स्य। बीभत्स्यम्। बीभत्समानः बीभत्स्यमानः बीभत्सिष्यमाणः। निन्दाभिन्नार्थे तु बधते। अबधिष्ट। बबधे इत्यादि।

बन्ध बन्धने क्र्यादिगणीयः पर० सक० अनिट्।

कर्तरि बध्नाति बध्नीत बध्नन्ति। बध्नीयात्। बध्नातु। बधान। अबध्नात्। अबान्त्सीत् अबान्धाम्। अबान्त्सुः। बबन्ध बबधतुः बबन्धतुः। कर्मणि बध्यते। अबन्धि। णिचि बन्धयति-ते। अबबन्धत्-त। सनि बिबन्त्सति।

क्षत्सु। बन्धनीयम्। बन्धनम्। बन्धः प्रबन्धः। बन्धकः। बन्धी। बन्धा। बद्धुः। बद्धिः। बन्धुम्। बन्धव्यम्। बद्ध्वा। आबध्य। बन्ध्यः। बध्नन् बध्यमानः। बन्त्स्यन् त्स्यमानः।

अनु—अनुबन्धने अनुबध्नाति। सम्—संबन्धे संबध्नाति। उत्—उद्बन्धने उद्बध्नाति। प्रति—प्रतिबन्धे प्रतिबध्नाति। नि—निबन्धे निबध्नाति। निर्—निर्बन्धे निर्बध्नाति। प्र-प्रबन्धे प्रबध्नाति।

बाध विघाते भ्वादिगणीयः आत्मनेपदी सक० सेट्।

कर्तरि बाधते। अबाधिष्ट। बबाधे। कर्मणि बाध्यते। अबाधि णिचि बाधयति-ते अबबाधत्-त।

Digitized by Google

कृत्सु बाधनीयम् । बाधनम् । बाधः । बाधकः । बाधित्वा । बाधितः । बाधा । बाधितुम् । बाधितव्यम् । बाधित्वा । अपबाध्य । बाध्यः । बाधमानः बाध्यमानः । बाधिष्यमाणः । सम्—संबाधने (अन्योन्यपीडने) संबाधते । संबाधः ।

बुध ज्ञाने दिवादिगणीयः आत्मनेपदी सकर्मकः अनिट् ।

कर्तरि बुध्यते । अबोधि अबुद्ध अभुत्स्म । बुबुधे । बोद्धासे । भुत्सीष्ट । भोत्स्यते । कर्मणि बुध्यते । णिचि बोधयति-ते । अबूबुधत्-त । सनि बुभुत्सते । यङि बोबुध्यते ।

कृत्सु बोधनीयम् । बोधनम् । बोधः । बोधकः । बोधी । बोद्धा । बुद्धः । बुद्धिः । बोद्धुम् । बोद्धव्यम् । बुद्ध्वा । संबुध्य । बोध्यः । बुध्यमानः । भुत्स्यमानः । णिचः बोधयिता । बोधितः । बोधना । बोधयितुम् । बोधयितव्यः । बोधयित्वा । प्रबोध्य । बोधय-न् मानः बोध्यमानः बोधयिष्यमाणः । सन: बुभुत्सा । बुभुत्सुः । बुभुत्सन् ।

उत्—उद्बोधे (उत्प्रेक्षायाम्) उद्बुध्यते । उत् बोधि उद्बोधने (उत्तेजने) उद्बोधयति उत्तेजयति । सम्-बोधि संबोधने (क्रियासु नियोगार्थमभिमुख्यसम्पादने) संबोधयति । संबोधितः ।

बुध बोधने भ्वादिगणीयः परस्मैपदी सवर्मकः अनिट् ।

कर्तरि बोधति । अबौत्सीत् । बुबोध बुबोधिथ बुबोधिव । अन्यत् दिवादिगणीयवत् अतरि बोधन् इति भेदः ।

Digitized by Google

वृ वरणे (प्रार्थने) क्र्यादिगणीयः परस्मैपदी सक० सेट् ।

कर्तरि वृणाति-वृणाति वृणीतः-वृणीतः वृण्वन्ति-वृण्वन्ति । अवारीत् । ववार ववरतुः वरीता वरिता । वीर्यात् । वरीष्यति-वरिष्यति । कर्मणि वीर्यते । अवारि । णिचि वारय-ति-ते । अवीवर-त्-त । सनि विवरीषति विवरिषति वुवूर्षति ।

कृत्सु वरणीयम् । वरणम् । वरः । वारकः । वरीता वरिता । वीर्णः । वीर्णिः । वरीतुम् वरितुम् वरितव्यः वरीतव्यः । वीर्त्वा । संवीर्य । वार्यः । वृण्वन् वृण्वन् । वीर्यमाणः । वरी-ष्यन् ष्यमाणः । (वरि-ष्यन् ष्यमाणः ।)

ब्रू कथने अदादिगणीयः उभयपदी द्विक० सेट् ।

कर्तरि ब्रवीति-आह । ब्रूतः-आहतुः ब्रुवन्ति-आहुः ब्रवीषि-आत्थ ब्रूथः-आहथुः ब्रूथ ब्रवीमि ब्रूवः ब्रूमः । ब्रूते ब्रुवाते ब्रुवते । ब्रूयात् ब्रुवीत । ब्रवीतु ब्रूताम् । अब्रवीत् अब्रूत । अवोचत् अवोचत । उवाच ऊचतुः उवचिथ उवक्थ ऊचिव । वक्ष्यसि । उच्यात् वक्ष्यति । कर्मणि उच्यते । अवाचि । ऊचे ऊचिषे । वक्ष्यसे । वक्षीष्ट । वक्ष्यते । णिचि वाचय-ति-ते । अवीवच-त्-त । सनि विवक्षति ।

कृत्सु वचनीयम् । वचनम् । वाकः अनुवाकः । वाचकः । वक्ता । उक्तः । उक्तिः । वक्तुम् । वक्तव्यम् । उक्त्वा । प्रोच्य । वाच्यम् । पदसमुदाये वाक्यम् । ब्रुवन् ब्रुवाणः । उच्यमानः कर्मणि ऊचिवान् । कानि अनूचानः । वक्ष्यमाणः । णिचः

Digitized by Google

वाचयिता। वाचितः। वाचना। वाचयितुम्। वाचयित्वा। संवाच्य। वाचय-न् मानः वाच्यमानः। वाचयि-ष्यन् ष्यमाणः। कर्म्मणि वाचिष्यमाणश्च। सनः विवक्षा। विवक्षुः। विवक्षन्।

भक्ष भक्षणे चुरादिगणीयः उभयपदी सक० सेट्।

कर्तरि भक्षयति-ते। अबभक्षत्-त। भक्षयिता-स्वि-से। भक्ष्यात् भक्षयिषीष्ट। कर्म्मणि भक्ष्यते। अभक्षि।

कृत्सु भक्षणीयम्। भक्षणम्। भक्षः। भक्षकः। भक्षयिता। भक्षितः। भक्षना। भक्षयितुम्। भक्षयितव्यम्। भक्षयित्वा। आभक्ष्य। भक्ष्यः। भक्षय-न् माणः भक्ष्यमाणः। भक्षयि-ष्यन् ष्यमाणः। कर्म्मणि भक्षिष्यमाणश्च।

भज भागे सेवने च भ्वादिगणीयः उभयपदी सक० अनिट्।

कर्तरि भजति-ते। अभाक्षीत्। अभक्त। बभाज भेजतुः भेजिथ-बभक्थ भेजे। भक्ष्यासि-से। भज्यात् भक्षीष्ट। कर्मणि भज्यते। अभाजि। णिचि भाजयति ते। अबीभज-त्-त। सनि विभक्षति-ते।

कृत्सु भजनीयम्। भजनम्। भागः। भाजकः। घिनुन् भागी। भक्ता। भक्तः। भक्तिः। भक्तुम्। भक्तव्यः। भक्त्वा। विभज्य। भाज्यम्। भाज्यम्। भजन् भजमानः भज्यमानः। भक्षन् भक्ष्यमाणः।

Digitized by Google

भण गन्धे भ्वादिगणीयः दिक० सेट्।

कर्तरि भणति। अभाणीत् अभणीत्। बभाण बभणतुः। कर्मणि भण्यते। अभाणि। णिचि भाणयति-ते। अबभाण-त्-त अबीभण-त्-त।

लृत्सु भणनीयम्। भणनम्। भाणः। भाणकः आभाणकः। भणिता। भणितः। भणिति:। भणितुम्। भणितव्यम्। भणित्वा। सम्भण्य। भाण्यम्। भणन् भण्यमानः। भणिष्यन् भाणमाणः।

भन्ज भञ्जने रुधादिगणीयः पर० सक० अनिट्।

कर्तरि भनक्ति भङ्क्तः भञ्जन्ति भनक्षि भङ्क्थः भङ्क्थ भनज्मि भञ्ज्वः भञ्ज्मः। भञ्जात्। भनक्तु भञ्जानि। अभनक्-ग्। अभाङ्क्षीत् अभाङ्क्ताम्। बभञ्ज बभञ्जतुः-बभञ्जतुः बभञ्जिथ बभङ्क्थ। भङ्क्ता। भञ्चात्। कर्मणि भज्यते। अभाजि अभञ्जि उपसर्गादपि प्राभञ्जि प्राभाजि। अभङ्क्षाताम्। णिचि भञ्जयति-ते। अवभञ्ज-त्-त। सनि विभङ्क्षति।

लृत्सु भञ्जनीयम्। भञ्जनम्। भङ्गः। भञ्जकः। प्रभञ्जनः। घुरच् भङ्गुरः। भङ्क्ता। भग्नः। भङ्क्तिः। भङ्क्तुम्। भङ्क्तव्यम्। भङ्क्त्वा। प्रभज्य। भङ्क्ष्यम्। भञ्जन्। भङ्क्ष्यन् भज्यमानः। भङ्क्ष्यन् भङ्क्ष्यमाणः।

भर्त्स भर्त्सने चुरादिगणीयः उभयपदी पाणिनीयमते आत्म० सक० सेट्।

Digitized by Google

कृत्सु वसनीयम्। वसनम्। वासः। वासकः। वासी। वसिता वस्ता। उषितः। उष्टः। वसितुम् वस्तुम्। वसितव्यम् वस्तव्यम्। उषित्वा। उषीष्य। वास्यम्। क्वसु। ऊषिवान्। वसन् अनूष्यमाणः। वत्स्यन् अनुवत्स्यमानः। उप—भोजनाभावे उपवसति उपोषितः। ल्युटि उपोषणमित्येके। अनु-अधि-उप-आङ्-सकः अनुवसति अधिवसति उपवसति। आवसति वा गृहम्। प्र-प्रवासे (विदेशगमने) प्रवसति प्रोषितः प्रोषिवान्।

वस आच्छादने अदा० आत्म० सक० सेट्।

कर्तरि वस्ते वसाते वसते वत्से वसाथे वध्वे वसे वस्वहे। वसीत वसीयाताम्। वसीरन्। वसाम्। अवस्त।

Digitized by Google

अवसिष्ट। वव्रसे। वसितासे। वसिषीष्ट। वसिष्यते। कर्मणि वस्यते अवासि। णिचि वासयति-ते। अवीवसत्-त।

कृत्सु वसनीयम्। वसनम्। वासः। णिच्-असि वासः वाससी। वासकः। वासी। वसिता। वसितः। वस्तिः। वसितुम्। वसितव्यम्। वसित्वा प्रवास्य। वास्यम्। वसानः वस्यमानः। वसिष्यमाणः।

वह प्रापणे स्वा० उभ० द्विक० अनिट् यजादि।

कर्तरि वहति-ते। वहेत्-त। वहतु ताम्। अवहत्-त अवात्सीत् अवाढाम् अवात्सुः अवात्सीः अवाढम् अवाढ अवात्सम् अवात्स अवोढ अवात्साताम् अवात्सत अवोढाः अवत्साथाम् अवोढ्वम् अवात्सि अवात्स्वहि। उवाह ऊहतुः उवहिथ उवोढ ऊहिव ऊह्हे उह्हिषे। वोढासि-से उह्यात् वक्षीष्ट। वक्ष्यति-ते। कर्मणि उह्यते अवाहि णिचि वाहयति-ते अवीवहत्-त।

कृत्सु। वहनीयम्। वहनम्। वाहः। प्रवहः। निवहः आवहः। वाहकः। वाही। वृत्त वहितः। वोढा। ऊढः। ऊढिः। वोढव्यम्। वोढुम्। ऊढ्वा। प्रोह्य। वक्ष्यम् वाह्यम्। वहन्। वहमानः उह्यमानः। वक्ष्यन् क्ष्यमाणः। उद् विवाहे उद्वहति उद्वूढः।

वा गमने हिंसने च अदा० पर० सक० अनिट्।

कर्तरि वाति। वायात्। वातु। अवात् अवाताम् अवुः-अवान्

Digitized by Google

अवासीत् अवासिष्टाम् अवासिषुः। ववौ ववतुः ववि-थ-ववाथ ववि व। वातासि। वायात्। वास्यति। कर्मणि वायते। अवायि। णिचि वापयति-ते अववीवपत्-त। सनि विवासति।

क्तत्सु वानीयम्। वानम्। वायः। वायकः। वायी। वाता। वातः। वातिः। वातुम्। वातव्यम्। वात्वा। प्रवाय। वेयम्। वान् वायमानः। वास्यन् स्यमानः।

वाञ्छ कामे भ्वाः परः सेट् इदित्।

कर्तरि वाञ्छति। अवाञ्छीत्। ववाञ्छ। कर्मणि वाञ्छ्यते। अवाञ्छि। णिचि वाञ्छयति-ते अववाञ्छत्-त।

क्तत्सु वाञ्छनीयम्। वाञ्छनम्। वाञ्छकः। वाञ्छी। वाञ्छिता वाञ्छितः। वाञ्छा। वाञ्छितुम्। वाञ्छितव्यम्। वाञ्छित्वा। प्रवाञ्छ्य। वाञ्छन् वाञ्छ्यमानः। वाञ्छिष्यन् ष्यमाणः।

विच पृथक्करणे रुधा० सक० उभय० अनिट्।

कर्त्तरि विनक्ति विङ्क्तः विञ्चन्ति विनक्षि विङ्क्थ विनक्मि विञ्चः विङ्क्ते विञ्चाते विञ्चते विङ्क्षे विङ्ग्ध्वे विञ्चे। विञ्चात् विञ्चीत। विनक्तु विङ्ग्धि विनचानि विङ्क्षम्। अविनक्-ग् अविङ्क्ष। अविचत् अवैक्षीत् अविक्त। विवेच विवेचिथ विविचिव विविचे। वेक्तासि क्षे। विच्यात् विक्षीष्ट। वेक्ष्यति। कर्मणि विच्यते। अवेचि। णिचि वेचयति-ते अवीविचत्-त। सनि विविक्षति।

Digitized by Google

कृत्सु वेचनीयम्। वेचनम्। वेकः। वेचकः। विणुन् विवेकी। विक्ता। विक्तः। विक्तिः। वेक्तव्यम्। वेक्तुम्। विक्त्वा। विविच्य। वेच्यम्। विच्चन् विच्चानः विच्यमानः। वेक्ष्यन् क्ष्यमाणः। वि—विवेके विविनक्ति विवेकः विवेचनम् विविक्तः।

विज भये कम्पे च तु० आत्म० अक० सेट्।

कर्त्तरि विजते। विजेत। विजताम्। अविजत। अविजिष्ट। विविजे। भावे विज्यते। अवेजि। णिचि वेजयति-ते अवीविजत्-त।

कृत्सु वेजनीयम्। वेजनम्। वेगः। उद्वेगः। वेजकः। वेजी। विजिता। विग्नः। विक्तिः। विजितुम्। विजितव्यम्। विजित्वा। उद्विज्य। वेग्यम्। विजमानः। विजिष्यमाणः।

विद भावे दिवा० आत्म० अक० अनिट्।

कर्त्तरि विद्यते। विद्येत। विद्यताम्। अविद्यत। अविद्त। किवेदे। वेत्तासे। वित्सीष्ट। वेद्यते। भावे विद्यते। अवेदि। णिचि वेदयति-ते। अवीविदत्-त। सनि विवित्सते।

कृत्सु वेदनीयम्। वेदनम्। वेदः। वेदकः। वेदी। वेत्ता। वित्तः। वित्तिः। वेत्तव्यम्। वेत्तुम्। वित्त्वा। संविद्य। वेद्यम्। विद्यमानः। वेत्स्यमानः।

Digitized by Google

विद ज्ञाने अदा० पर० सक० सेट्।

कर्तरि वेद वेत्ति विदतुः-वित्तः विदुः-विदन्ति वेत्थ-वेत्सि विदथुः- वित्थः विद वित्थ वेद वेद्मि विद्व विद्वः विद्म विद्मः। वित्तात्। वेत्तु-विदाङ्करोतु वित्ताम् विदाङ्कुरुताम् विदन्तु विदाङ्कुर्वन्तु विद्धि विदाङ्कुरु वित्तम् विदाङ्कुरुतम् वित्त विदाङ्कुरुत वेदानि विदाङ्करवाणि विदाव विदाङ्करवाव। ङाम्पक्षे आत्मनेपदञ्च विदाङ्कुरुताम् विदाङ्कुर्वाताम् विदाङ्कुर्वताम् विदाङ्कुरुष्व विदाङ्कुर्वाथाम् विदाङ्कुरुध्वम् विदाङ्करवै विदाङ्करवावहै। अवेत्-द् अवेः अवित्ताम् अविदुः-अविदन् अवेत्। अवेदीत् अवेदिष्टाम् अवेदिषुः। विवेद विदाञ्चभूव विदामास विदाञ्चकार विवेद। वेदिता। वित्तात्। वेदिष्यति। कर्मणि। विद्यते अवेदि णिचि वेदयति-ते अवीविदत् त। सनि विविदिषति।

कृत्सु वेदनीयम्। वेदनम्। वेदः। असि वेदाः। जातवेदाः। वेदकः। वेदी। वेदिता औणादिके तृचि तु वेत्ता। विदितः। वित्तिः। वेदितव्यम्। वेदितुम्। विदित्वा। संविद्य। वेद्यम्। विदन् विद्यमानः। वेदिष्यन् ष्यमाणः सम् आत्म० अक० संवित्ते संविदाते संविदते संविद्रते।

विद लाभे तुदा० उभ० सक० अनिट् सुचादि०।

कर्तरि विन्दति-ते। विन्देत् त। विन्दतु-ताम्। अविन्दत्-त। अविदत् अवित्त। विवेद विवेदिथ विविदिव विविदे।

Digitized by Google

वेत्ता सि-से। विद्यात् वित्सीष्ट। वेत्स्यति। कर्मणि विद्यते अवेदि। णिचि वेदयति-ते। अवीविदत्-त। सनि विवित्सति-ते।

कृत्सु दैवादिकवत्। वित्ता विन्नः वेत्तुम्। वेत्तव्यम् वेत्ता विन्दन् विन्दमान वेत्स्यन् व्यमाण इति भेदः। परि परिवेदने परिविन्दति परिवेत्ता परिविन्नः।

विश उपवेशने तु० पर० अक० अनिट्।

कर्तरि विशति। विशेत्। विशताम्। अविशत्। अविक्षत्। विवेश। वेष्टा। विश्यात्। वेक्ष्यति। भावे विश्यते। अवेशि। णिचि वेशयति-ते अवीविशत्-त सनि विविक्षति।

कृत्सु वेशनीयम्। वेशनम्। वेशः। वेशकः। वेशी। वेष्टा। विष्टः। विष्टिः। वेष्टव्यम्। वेष्टुम्। विष्ट्वा। उपविश्य। वेश्यम्। विशन्। वेक्ष्यन्। नि आत्म निवेशयते। अभिनिवेशने सक०। धर्ममभिनिवेशयते। अन्यत्रार्थे अक०। सम् शयने संविशति। निर् भृतौ भोगे च निर्विशति। उप-स्थितौ अक० उपविशति। परि-परिवेशने। परिविशति।

वृ भजने क्रया० आत्म० सक० सेट्।

कर्तरि वृणीते-वृणाते वृण्वते। वृणीत। वृणीताम्। अवृणीत। अवरिष्ट अवरीष्ट अवृत। वव्रे वव्रिषे। वरीतासे वरितासे। वरिषीष्ट वृषीष्ट। वरीष्यते वरिष्यते।

Digitized by Google

कर्मणि व्रियते। अवारि अवारिषाताम् अवरीषाताम् अवरिषाताम्। अवृषाताम्। णिचि वारयति-ते अवीवरत्-त। सनि विवरिषते विवरीषते वुवूर्षते।

कृत्सु वरणीयम्। वरणम्। वारः संवारः। विवारः। नीवारः। वरः। वारकः। वारी। वरीता-वरिता। वृतः। वृतिः। वरीतव्यम् वरितव्यम्। वरीतुम् वरितुम्। वृत्वा। प्रवृत्य। वार्यम्। वृण्वानः व्रियमाणः वरीष्यमाणः वरिष्यमाणः। कर्मणि वारिष्यमाणश्च। एण्य वरेण्यः।

वृ वरणे स्वा० उभ० सक० सेट्।

कर्तरि वृणोति वृणुतः वृण्वन्ति वृणोषि वृणोमि वृण्वः वृणुवः वृणुमः वृणुते वृण्वाते वृण्वते। वृणुयात् वृण्वीत। वृणोतु वृणुताम्। अवृणोत् अवृणुत। अवारीत् अवारिष्टाम् अवारिषुः अवरीष्ट अवरिष्ट अवृत। ववार ववरिथ वव्रे वविषे। वरीतासि-से वरितासि से। व्रियात् वरिषीष्ट वृषीष्ट। वरिष्यति-ते वरीष्यति-ते। कर्मणि व्रियते। अवारि।

कृत्सु शतरि वृण्वन् वृण्वानः। स्यट वरीष्यन् वरिष्यन् एवं स्यमाने इतिभेदः अन्यत् क्र्यादिगणीयवत्। सम् सङ्कोचने। संवृणुते। वि-विस्तारकरणे विवृणोति विवृण्वती शैलसुतापि भावमिति कुमारः।

Digitized by Google

वृत वर्त्तने भ्वा० आत्म० अक० सेट् वृतादि।

कर्तरि वर्त्तते। वर्त्तेते। वर्त्तन्ते। वर्त्तताम्। अवर्त्तत। लुङि लृटि लृङि च उभ०। अवृतत् अवर्तिष्ट। वृतते वृतातिषे। वर्तितासे। वर्त्स्यति वर्तिष्यते। अवर्त्स्यत् अवर्तिष्यत। भावे वृत्यते अवर्ति। णिचि। वर्तयति-ते अवीवृतत्-त अववर्तत्-त। सनि विवर्तिषते।

कृत्सु वर्तनीयम्। वर्तनम्। वर्तः। वर्तकः। वर्त्ती। वर्तिता वृत्तः। वृत्तिः। वर्तितव्यम्। वर्तितुम्। वृत्वा। प्रवृत्य। वृत्यम्। वर्तमानः। वर्त्स्यन् वर्तिष्यमाणः। इष्णु वर्तिष्णुः सनः विवृत्सा विवर्तिषा। विवृत्सुः विवर्तिषुः। विवर्तिषमाणः।

वृध वर्द्धने भ्वा० आत्म० अक० सेट् वृतादि।

कर्तरि वर्द्धते। लुङि लृटि लृङि च उभ०। अवृधत् अवर्द्धिष्ट। वृधे। वर्द्धितासे। वर्द्धिषीष्ट। वर्त्स्यति वर्द्धिष्यते। अवर्त्स्यत् अवर्द्धिष्यत। भावे वृध्यते अवर्द्धि। णिचि वर्धयति-ते अवीवृधत्-त अववर्धत्-त। सनि विवर्द्धिषते।

कृत्सु वर्द्धनीयम्। वर्द्धनम्। वर्द्धः। वर्द्धकः। वर्द्धी। इष्णु वर्द्धिष्णुः। वर्द्धिता। वृद्धः। वृद्धिः। वर्द्धितुम् वर्द्धितव्यम्। वृद्ध्वा। संवृध्य। वृध्यम्। वर्द्धमानः। वर्त्स्यन् वर्द्धिष्यमाणः। सनि विवृत्सा विवर्द्धिषा। विवृत्सुः विवर्द्धिषुः। विवर्द्धिषमाणः।

Digitized by Google

हृह करिगर्ज्जने हृद्धौ च भ्वा० पर० अकर्मक:
सेट् इदित्।

कर्तरि हृंहति। हृंहेत्। अहृंहीत्। भावे हृंह्यते। अहृंहि णिचि हृंहयति ते। अवहृंहत्-त।

कृत्सु हृंहणीयम्। हृंहणम्। हृंहः। हृंहकः। हृंही। हृंहिता हृंहितम्। हृंहा। हृंहितव्यम्। हृंहितुम्। हृंहित्वा। संहृंह्य। हृंह्यम्। हृंहन्। हृंहिष्यन्। मनि नि० ब्रह्मन् पवर्गीयादिवदुक्तिसु प्रामादिकी।

वृ वृतौ क्रया० उभ० सक० सेट् ष्यादि।

कर्तरि वृणाति वृणीत: वृणीते। वृणीयात् वृणीत। वृणातु वृणीताम्। अवृणात् अवृणीत। अवारीत् अवरिष्ट अवरीष्ट अवूर्ष्ट। ववार ववरिथ ववरे ववरिषे। वरीतासि-से वरिता-सि-से। वरिषीष्ट वूर्षीष्ट। वरीष्यति-ते वरिष्यति-ते। कर्मणि वूर्य्यते अवारि अवारिषाताम् अवरीषाताम् अवरिषाताम् अवूर्षाताम्। णिचि वारयति-ते अवीवरत्-त। सनि विवरीषति-ते विवरिषति-ते वुवूर्षति-ते।

कृत्सु वरणीयम्। वरणम्। वरः। वारकः। वारी। वरीता वरिता। वूर्णः। वूर्त्तिः। वरीतुम् वरितुम्। वरीतव्यम्। वरितव्यम्। वृत्वा। संवूर्य्य। वार्य्यम्। वृणन् वृणानः वूर्य्यमाणः। वरीष्यन् षमाणः वरिषन् षमाणः कर्मणि वारिषमाणश्च।

Digitized by Google

वे तन्तुसन्ताने भ्वा० उभ० अनिट् यजादि ।

कर्तरि वयति ते । वयेत्-त । वयतु-ताम् । अवयत्-त । अवासीत् अवास्त । उवाय ऊवतुः ऊयतुः उवयिथ ऊवे ऊये । वा-सि-से । ऊयात् वासीष्ट । वास्यति-ते । कर्मणि ऊयते औयत । अवायि । अवायिषाताम् अवासाताम् । णिचि वापयति-ते । अवीवपत्-त ।

कृत्सु वानीयम् । वानम् । वायः । तन्तुवायः । वायकः । वायी वाता । ऊतः । ऊतिः । वातव्यम् । वातुम् । ऊत्वा । संवाय । वेयम् । वय-न्-मानः ऊयमानः । वास्य-न्-स्यमानः कर्मणि वायिष्यमाणश्च ।

वेप चलने भ्वा० आत्म० अक० सेट् ।

कर्तरि वेपते । वेपेत । वेपताम् । अवेपत । अवेपिष्ट । भावे वेप्यते । अवेपि । णिचि पर० वेपयति अववेपत् ।

कृत्सु वेपनीयम् प्रवेपनीयम् । प्रवपनं । वेपः । वेपकः । वेपी । वेपिता । वेपितः । वेपा । वेपितव्यम् । वेपितुम् । वेपित्वा । संवेप्य । वेप्यम् । वेपमानः । वेपिष्यमाणः । अथु वेपथुः ।

वेष्ट वेष्टने भ्वा० आत्म० सक० सेट् ।

कर्तरि वेष्टते । चेष्टवत् सर्वं चकारस्थाने वकारमात्रभेदः । णिचि उभ० वेष्टयति-ते । अववेष्टत्त अविवेष्टत्-त ।

व्यथ व्यथने दुःखे भ्वा० अक० आत्म० सेट् घटादि ।

कर्तरि व्यथते । व्यथेत । व्यथताम् । अव्यथत । अव्यथिष्ट ।

Digitized by Google

विव्यथे। भावे। व्यथ्यते। अव्याधि णिचि व्यथयति-ते। अविव्यथत्-त।

कृत्सु व्यथनीयम्। व्यथनम्। व्याधः। व्याधकः। व्याधी। व्यथिता। व्यथितः। व्यथा। व्यथितुम्। व्यथितव्यम्। व्यथित्वा। संव्यथ्य। व्याध्यम्। व्यथमानः। व्यथिष्यमाणः।

व्यध ताड़ने दिवा० पर० सक० अनिट्।

कर्तरि विध्यति। विध्येत। विध्यतु। अविध्यत्। अव्यद्ध। विव्याध विविधतुः विव्यधिथ विव्यद्ध। व्यद्धा। विध्यात् व्यत्स्यति। कर्मणि विध्यते। अव्याधि। णिचि व्याधयति-ते अविव्यधत्-त।

कृत्सु व्यधनीयम्। व्यधनम्। व्याधः। ण व्याधः। वेधसु तौदादिकविधतेरूपम्। व्याधकः। व्याधी। व्यद्धा। विद्धः। विद्धिः। व्यद्धुम्। व्यद्धव्यम्। विद्ध्वा। आविध्य। व्याध्यम्। विध्यन् विध्यमानः। व्यत्स्यन् त्स्यमानः। क्विप् आवित्-द्ध मर्म्मावित् द्ध मर्म्माविधम्।

व्ये वरणे भ्वा० उभ० सक० अनिट्।

कर्तरि व्ययति-ते। व्ययेत्-त। व्ययतु-ताम्। अव्ययत्-त। अव्यासीत् अव्यास्त। विव्यौ विव्यतुः विव्यिथ विव्यिव विव्ये। व्यातासि-से। वीयात् व्यासीष्ट। व्यास्यति-ते। कर्मणि वीयते। अव्यायि। णिचि व्यापयति-ते अविव्यपत्-त।

Digitized by Google

कृत्सु व्यानीयम्। व्यानम्। व्यायः। व्यायकः। व्यायी। व्याता। वीतः वीतिः। व्यातव्यम्। व्यातुम्। वीत्वा। संवीय। संव्याय एवं परे:। व्येयम्। व्ययन् मानः वीयमानः। व्यास्यन् स्यमानः कर्मणि व्यायिष्यमाणश्च।

व्रज गतौ भ्वादि० सक० पर० सेट्।

कर्तरि व्रजति व्रजेत्। व्रजतु। अव्रजत्। अव्राजीत्। वव्राज कर्मणि व्रज्यते अव्राजि। णिचि व्राजयति-ते अविव्रजत्-त।

कृत्सु व्रजनीयम्। व्रजनम्। व्रजः। व्राजः। परिव्राजकः। व्राजी। व्रजिता। व्रजितः। क्यप् व्रज्या। व्रजितव्यम्। व्रजितुम्। व्रजित्वा। प्रव्रज्य। व्राज्यम्। व्रजन् व्रज्यमानः। व्रजिष्यन् ष्यमाणः। परि—सन्न्यस्ने परिव्रजति क्विप् परिव्राट्। अनु—अनुगमने अनुव्रजति। अप—अपगमने अपव्रजति।

व्रश्च छेदने तुदा० पर० सक० वेट्।

कर्तरि व्रश्चति। व्रश्चेत्। व्रश्चतु। अव्रश्चत्। अव्रश्चीत् अव्राक्षीत्। वव्रश्च वव्रश्चतुः वव्रश्चिथ वव्रष्ठ वव्रश्चिव वव्रश्च। व्रश्चिता व्रष्टा। व्रश्च्यात्। व्रश्चिष्यति व्रक्ष्यति। कर्मणि व्रश्च्यते अव्राश्चि। णिचि। व्रश्चयति-ते अवव्रश्चत्-त।

कृत्सु व्रश्चनीयम्। व्रश्चनम्। ल्यु व्रश्चनः। व्रश्चः। व्रश्चकः। व्रश्ची। व्रश्चिता व्रष्टा। वृक्णः। वृष्टिः। व्रश्चितव्यं व्रष्टव्यम्। व्रश्चितुम्। व्रष्टुम्। व्रश्चित्वा। संवृश्च्य व्रश्चम् वृश्चन् वृश्चमानः। व्रश्चिष्यन् ष्यमाणः व्र-क्ष्यन् क्ष्यमाणः।

Digitized by Google

शक शक्तौ स्वा० पर० अक० अनिट् ।

कर्तरि शक्नोति शक्नुतः शक्नुवन्ति । शक्नुव । शक्नुयात् । शक्नोतु । अशक्नोत् । अशकत् । शशाक शेकतुः । शक्ता । शक्यात् । शक्ष्यति । भावे शक्यते अशाकि । णिचि शाकयति-ते अशीशकत्-त ।

कृत्सु शकनीयम् । शकनम् । शाकः । शक्ता । शक्तः । शक्तिः । शक्तम् । शक्तव्यम् । शक्त्वा । प्रशक्य । शाक्यम् । शक्नुवन् । शक्नन् ।

शक शक्तौ दिवादि० उभ० अक० सेट् ।

कर्तरि शक्यति-ते । अशाकीत् अशकीत् अशकिष्ट । शशाक शेके । शकितासि-से । शक्यात् शकिषीष्ट । शकिष्यति ते । भावे शक्यते । अशाकि । णिचि शाकयति-ते अशीशकत्-त ।

कृत्सु शकितः । शकिता । शकितव्यम् । शकितुम् । शकित्वा । शक्यन् शक्यमानः शकिष्यन् । ष्यमाणः इति भेदः । अन्यत् स्वादिगणीयवत् ।

शक त्रासे सन्देहे च भ्वा० आत्म० त्रासे अक० सन्देहे सक० सेट् इदित् ।

कर्तरि शङ्कते । शङ्केत । शङ्कताम् । अशङ्कत अशङ्किष्ट । शशङ्के । कर्मणि भावे च । शङ्क्यते । अशङ्कि । णिचि शङ्कयति ते । अशशङ्कत्-त ।

Digitized by Google

कृत्सु शङ्कनीयम् । शङ्कनम् । शङ्कः । शङ्ककः आशङ्की । शङ्किता । शङ्कितः । शङ्का । लङ्कापि शङ्काकुलेति नाटकम् । अशक्यशङ्कव्यभिचारहेतुरितिनैषधम् । शङ्कितुम् । शङ्कितव्यम् । शङ्कित्वा । आशङ्क्य । शङ्कम् । शङ्कमानः शङ्कमानः । शङ्किष्यमाणः ।

शन्स कथने स्तुतौ च भ्वा० पर० सक० सेट् ।

कर्तरि शंसति । शंसेत् । शंसतु । अशंसत् । अशंसीत् । शशंस । शंसिता । शस्यात् । कर्मणि । शस्यते । अशंसि । णिचि शंसयति-ते अशशंसत्-त ।

कृत्सु शंसनीयम् । शंसनम् । शंसः । शंसकः । शंसी । शंसिता । शस्तः । शस्तिः । शंसा । शंसितुम् । शंसितव्यम् । शंसित्वा शस्त्वा । प्रशस्य । शंस्यम् । शंसन् । शंस्यमानः । शंसि-ष्यन् ष्यमाणः । आ—आशंसने इष्टार्थप्रार्थने आत्म० आशंसते आशंसुः । प्र—प्रशंसायाम् । प्रशंसति प्रशस्तिः प्रशंसा । अभि—अभिशापे अपवादे च अभिशंसति अभिशस्तः । हृदिहृयं तेन न नलोपः आशंस्यते ।

शप आक्रोशे भ्वा० उभ० सक० अनिट् ।

कर्तरि शपति-ते । शपेत्-त । अशाप्सीत् अशप्त । शशाप शेपे । शप्ता-सि से । शप्यात् शप्सीष्ट । कर्मणि शप्यते अशापि । णिचि शापयति-ते अशीशपत्-त ।

कृत्सु शपनीयम् । शपनम् । शापः । शापकः । शापी । शप्ता

Digitized by Google

शप्तः। शप्तिः। शप्तव्यम्। शप्तुम्। शप्त्वा। अभिशप्य। शप्यम्। शप-न् मानः शप्यमानः। शप्स्यन् मानः। शपथे आत्म० शपते।

शम शान्तौ दिवा० पर० अक० सेट् शमादि।

कर्तरि शाम्यति। शाम्येत्। अशमत् अशमीत्। शशाम शेमिथ। शमिता। शम्यात्। भावे शम्यते। अशमि। णिचि शमयति शामयति। अशीशमत्-त अशशामत्-त। कर्मणि अशामि अशमि। अशामयिषाताम् अशमयिषाताम् अशामिषाताम् अशमिषाताम्।

कृत्सु शमनीयम्। शमनम्। णिचः-ल्यु शमनः। शमः। शमकः। शमी। शमिता। शान्तः। णिचस्तु शान्तः शमितः। शान्तिः। शमितव्यम्। शमितुम्। शमित्वा। शान्त्वा। प्रशम्य। शम्यम्। शाम्यन्। शमिष्यन्। उपनिवृत्तौ उपशाम्यति उपशमः।

शास शासने अदा० पर० द्विक० सेट् जक्षादि।

कर्तरि शास्ति शिष्टः शासति शास्ति शिष्ठः शिष्ठ शास्ति शिष्वः। शिष्यात्। शास्तु शिष्टाम् शासतु शाधि। अशात् अशिष्टाम् अशासुः। अशाः। अशासत्। शशास। शासिता। कर्मणि शिष्यते। अशासि। णिचि शासयति-ते अशशासत्-त।

कृत्सु शासनीयम्। शासनम्। शासः शासकः। शासी। शासिता। शास्ता तु औणादिके तृचि नेट्। शिष्टः।

Digitized by Google

शिष्टिः। शासितव्यम्। शासितुम्। शिष्ट्वा। संशिष्य। शिष्यः। शास्यः। शास्त्। शिष्यमाणः। शासिषमाणः। आ—आशंसने आशीर्वादप्रार्थने आशास्ते आशासाते आशासते क्विप् आशीः।

शिच्च शिचषे भ्वा० आत्म० सक० सेट्।

कर्तरि शिचते। अशिचिष्ट। कर्मणि शिच्यते। अशिचि। णिचि शिचयति-ते अशिशिचत्-त।

कृत्सु शिचनीयम्। शिचनम्। शिचः। शिचकः। णिचोऽपि शिचकः। शिची। शिचिता। शिचितः। शिचा। शिचितव्यम्। शिचितुम्। शिचित्वा। संशिच्य। शिच्यम्। शिचमानः शिच्यमाणः। शिचिषमाणः।

शिष विशेषे रुधा० पर० सक० अनिट्।

कर्तरि शिनष्टि शिंष्टः शिंषति शिनक्षि शिंष्टः शिंष्ठ शिनष्मि शिंष्वः। शिंष्यात्। शिनष्टु शिंष्टाम् शिषतु शिण्ढि। अशिनट्-ड्। अशिषत्। शिशेष। शेष्टा। शिषात् शेक्ष्यति। कर्मणि शिष्यते। अशेषि। णिचि शेषयति-ते अशीशिषत्-त।

कृत्सु शेषणीयम्। शेषणम्। शेषः। शेषकः। शेषी। शेष्टा। शिष्टः। शिष्टिः। शेष्टव्यम्। शेष्टुम्। शिष्ट्वा। विशिष्य। शेष्यम्। शिंषन् शिष्यमाणः। शेक्ष्यन् शेक्ष्यमाणः। वि—विशेषकरणे विशिनष्टि विशिष्टः विशेष्यम् विशेषणम्।

Digitized by Google

शिष अवशेषे वा चुरा० उभय० पक्षे भ्वा० पर० अक० सेट्।

कर्तरि शेषयति-ते शेषति। अशीशिषत् त अशेषीत्। भावे शिष्यते अशेषि।

कृत्सु शेषयिता शेषिता। शेषितः शिष्टः। शेषयितव्यम् शेषितव्यम्। शेषयितुम् शेषितुम्। शेषयित्वा शेषित्वा शिष्ट्वा। शेषय-न् माणः शेषन् शिष्यमाणः। शेषयिष्य-न् माणः शेषि-ष्यन् ष्यमाणः। वि—अतिशयने विशेषयति अव—अवशेषे अवशेषयति अवशेषितः अवशिष्टः। अन्यत् रौधादिकवत्।

शी शयने अदा० आत्म० अक० सेट्।

कर्त्तरि शेते शयाते शेरते शेषे। शयीत। शेताम् शयाताम् शेरताम्। अशेत अशेरत। अशयिष्ट। शिष्ये। शयिताहे। शयिषीष्ट। भावे शय्यते। अशायि अशायिषाताम् अशयिषाताम्।

कृत्सु शयनीयम्। शयनम्। शयः उत्तानशयः। शायकः। शायी। शयिता। शयितः। शय्या। शयितव्यम्। शयितुम्। शायित्वा। उपशय्य। शेयम्। शयानः। शयिष्यमाणः। अति—अतिक्रमे अतिशेते अतिशयितः। अधिपूर्व्वकः सकः० शय्यामधिशेते।

शुच शोके भ्वा० पर० सक० सेट्।

तादावार्द्धधातुके वेड़ित्यन्ये।

कर्त्तरि शोचति। शोचेत्। शोचतु। अशोचत्। अशोचीत्। शुशोच। शोचिता शोक्ता। कर्मणि शुच्यते अशोचि शुचि

Digitized by Google

शोचयति-ते अशूशुचत्-त। सनि शुशोचिषति शुशुचिषति।

कृत्सु शोचनीयम्। शोचनम्। शोकः। शोचकः शोकी। शोचिता शोक्ता। शोचितः। मतान्तरे शुक्तः। शुक्तिः। शोचितव्यम् शोक्तव्यम्। शोचितुम् शोक्तुम्। शोचित्वा शुचित्वा शुक्त्वा। विशुच्य। शोच्यम्। शोचन्। शोचिष्यन् अनु—अनुशोके सक० अनुशोचति अनुशोचनम्।

शुध शौचे शोधने च दिवा० पर० अक० अनिट्।

कर्त्तरि शुध्यति। शुध्येत। अशुधत्। शुशोध। शोद्धा। भावे शुध्यते अशोधि। णिचि शोधयति-ते अशूशुधत्।

कृत्सु शोधनीयम्। शोधनम्। शोधः। शोधकः। शोधी। शोद्धा। शुद्धः। शुद्धिः। शोद्धव्यम्। शोद्धुम्। शुद्ध्वा। विशुध्य। शोध्यम्। शुध्यन् शोत्स्यन्।

शुभ दीप्तौ भ्वा० आत्म० अक० सेट्।

कर्त्तरि शोभते। अशुभत् अशोभिष्ट। शुशुभे। भावे शुभ्यते अशोभि। णिचि शोभयति-ते। अशूशुभत्-त। सनि शुशोभिषते शुशुभिषते।

कृत्सु शोभनीयम्। शोभनम्। शोभः। शोभकः। शोभी। शोभिता। शोभितः। शोभा। शोभितव्यम्। शोभितुम्। शोभित्वा शुभित्वा। उपशुभ्य। शोभ्यम्। शोभमानः। शोभिष्यमाणः।

Digitized by Google

ष्युत क्षरणे भ्वा० पर० अक० सेट्।

कर्त्तरि स्योतति। अस्युतत् अस्योतीत्। स्युस्योत। भावे स्युत्यते। अस्योति। णिचि स्योतयति ते

कृत्सु स्योतनीयम्। स्योतनम्। स्योतः। स्योतिता। स्युतितः। स्युत्तिः। स्योतितव्यम्। स्योतितुम्। स्युत्तित्वा स्योतित्वा। स्योत्यम्। स्योतन्। स्योतिष्यन्।

ष्वस प्राणने अदा० पर० अक० सेट् रुदादि।

कर्त्तरि ष्वसिति ष्वसितः ष्वसन्ति ष्वसिषि ष्वसिथः ष्वसिमि ष्वसिवः। ष्वस्यात्। ष्वसितु ष्वसिताम् ष्वसन्तु ष्वसिहि। अष्वसीत् अष्वसिताम् अष्वसन्। अष्वसीत्। अष्वास भावे ष्वस्यते। अष्वासि। णिचि ष्वासयति-ते अशिष्वसत्-त।

कृत्सु ष्वसनीयम्। ष्वसनम्। ष्वसनः। ष्वासः। ष्वासकः। ष्वासी। ष्वसिता। ष्वसितः। ष्वस्तिः। ष्वसितव्यम्। ष्वसितुम्। ष्वसित्वा। विष्वस्य। ष्वास्यम्। ष्वसन् ष्वसिष्यन्। वि—विष्वासे विष्वसिति विष्वसितः-विष्वस्तः। आ—आष्वासे आष्वसिति आष्वसितः—आष्वस्तः। प्रादिपूर्व्वकाः प्रष्वासनिष्वासाद्यर्थे।

अस्य मोचने क्रया० पर० सक० सेट्।

कर्तरि अस्त्राति अस्त्रीतः अस्त्रन्ति अस्त्रासि सर्व्वं ग्रस्यवत् ग्रस्यते स्रमात्रभेदः।

Digitized by Google

अम तपसि खेदे च दिवा० पर० अक० सेट् शमादि ।

कर्तरि आम्यति । अआम्यत् । अअमत्—अअमीत् । भावे अम्यते । अअमि वेसु व्यअमि—व्यआमि । णिचि अमयति-ते अअिअमत्-त । वि—विश्रामे विआम्यति विअमः—विआमः । आ—आअयकरणे आआम्यति आअमः ।

आ विक्लृत्तिरूपे पाके अदा० पर० अक० अनिट् ।

कर्तरि आति । अआरीत् । अस्ते । आता । भावे आयते । अआयि । णिचि आपयति-ते अअिआपत् ।

कृत्सु आणम् । णिचसु आपणीयम् आपणम् । आपयिता । आपितः । आपणा । आपयितव्यम् । आपयितुम् । आपयित्वा । आप्यम् । आपय-न् माणः । आप्यमाणः । आपयिष्यन् ष्यमाणः । कर्म्मणि आपिष्यमाणश्च ।

श्रि सेवने भ्वा० उभ० सक० सेट् ।

कर्तरि श्रयति ते । अश्रेत्-त । अअिश्रियत्-त । अिश्राय अिश्रियतुः अिश्रियिये । श्रयितासि-से । श्रीयात् श्रयिषीष्ट । कर्म्मणि श्रीयते अश्रायि । णिचि श्रापयति-ते अअिश्रयत्-त ।

कृत्सु श्रयणीयम् । श्रयणम् । श्रयः । श्रायकः । श्रायी । धूनि संश्रयी । श्रयिता । श्रितः । श्रितिः । श्रयितव्यम् । श्रयितुम् । श्रयित्वा । आश्रित्य । आश्रेयम् ।

Digitized by Google

अय-न् माणः अीयमाणः। अयिष्यन् ष्यमाणः। कर्मणि आयिष्यमाणश्च। आ—अवलम्बने आश्रयति-ते आश्रयः आश्रितः। प्र-प्रागल्भ्ये अक० प्रश्रयति-प्रश्रयः। उद्-उच्चभवने अक० उच्छ्रयति उच्छ्रितः। उच्छ्रयः उच्छ्रायः

श्रु अवणे भ्वा० पर० सक० अनिट्।

कर्तरि शृणोति शृणुतः शृण्वन्ति शृणोषि शृणोमि शृणुवः—शृण्वः शृणुमः—शृण्मः। शृणुयात्। शृणोतु। अशृणोत्। अशौषीत्। शुश्राव शुश्रुवतुः शुश्रविथ—शुश्रोथ शुश्रुव। श्रोता। श्रूयात्। श्रोष्यति। कर्मणि श्रूयते अश्राव्रि। अश्राविषाताम् अश्रोषाताम्। णिचि श्रावयति ते अशिश्रवत्-त—अशुश्रवत् त। सनि शुश्रूषते। णिचः सनि शुश्रिश्रावयिषति-ते।

कृत्सु श्रवणीयम्। श्रवणम्। श्रवः—आश्रावः। आवकः। असि श्रवः। श्रावी। श्रोता। ष्ट्रन् श्रोत्रम्। श्रुतः। श्रुतिः। श्रोतव्यम्। श्रोतुम्। श्रुत्वा। उपश्रुत्य। श्रव्यम् श्राव्यम्। शृण्वन्। श्रूयमाणः श्रोष्यन् ष्यमाणः कर्मणि श्राविषमाणश्च। प्रति-आ-अङ्गीकारे प्रतिशृणोति आशृणोति। सम् संश्रवे आत्म० अक०। संशृणुते संशृण्वाते संशृण्वते।

श्लाघ विकत्थने (आत्मगुणाविष्करणे) अक० प्रशंसने सक० भ्वा० आत्म० सेट्।

कर्तरि श्लाघते। अश्लाघिष्ट। भावे श्लाघ्यते अश्लाघि। णिचि श्लाघयति-ते। अशश्लाघत्-त।

Digitized by Google

कृत्सु श्राघनीयम्। श्राघनम्। श्राघकः। श्राघी। श्राघिता। श्राघितः श्राघा। श्राघितव्यम्। श्राघितुम्। श्राघित्वा श्राघ्यम्। श्राघ्यमानः। श्राघिष्यमाणः।

श्लिष आलिङ्गने सम्बन्धमात्रे एकक्रियशब्देनोभयार्थत्वे धने च दिवा० पर० सक० अनिट्।

कर्तरि श्लिष्यति। श्लिष्येत्। श्लिष्यतु। अश्लिष्यत्। अश्लिक्षत्। आलिङ्गनभिन्नार्थे अश्लैक्षीत्। श्लेष्टा श्लेक्ष्यति। कर्मणि श्लिष्यते अश्लेषि अश्लिक्षाताम्। णिचि श्लेषयति-ते। अशिश्लिषत् त।

कृत्सु श्लेषणीयम् श्लेषणम्। श्लेषः। श्लेषकः। श्लेषी। श्लेष्टा। श्लिष्टः। श्लिष्टिः। श्लेष्टव्यम्। श्लेष्टुम्। श्लिष्ट्वा। प्रश्लिष्य। श्लेष्यम्। श्लिष्यन् श्लिष्यमाणः। श्लेष्य-न् माणः। प्र-प्र-श्लेषे प्रश्लिष्यति प्रश्लेषः।

श्रि गतौ सक० स्तुतौ अक० भ्वा० पर० सेट्।

कर्तरि श्रयति। श्रयेत्। श्रयतु। अश्रयत्। अशिश्रियत्—अश्रत्—अश्रयीत् अशिश्रियताम्—अश्रताम् अश्रयिष्टाम्। शुश्राव—शिश्राय शुश्रुवतुः—शिश्रियतुः शुश्रविथ—शिश्रयिथ। श्रयिता। श्रूयात्। श्रयिष्यति। कर्मणि भावे च श्रूयते। अश्रायि अश्रायिषाताम्—अश्रयिषाताम्। णिचि श्रापयति अशीश्रवत् त—अशिश्रयत्-त। यङि शोशूयते शेश्रीयते।

कृत्सु श्रयनीयम्। श्रयनम्। श्रयः। श्रायकः अथ श्रयथुः। श्रायिता। श्रूनः। श्रूतिः। श्रयितव्यम्। श्रयितुम्। श्र-

Digitized by Google

यित्वा। उच्छूय। ख्येयम्। ख्यन् ख्यमानः। ख्यियन् ख्यमाणः कर्मणि ख्यायिषमाणश्च। उद् स्फीतताभवने अक०। उच्छूयति उच्छूनः।

ष्ठिव निरसने दि० पर० सक० सेट्।

कर्तरि ष्ठीव्यति। ष्ठीव्येत् अष्ठेवीत्। टिष्ठेव तिष्ठेव। कर्मणि ष्ठीव्यते। अष्ठेवि। णिचि ष्ठेवयति-ते अटिष्ठिवत्-त अतिष्ठिवत्-त।

क्तादुसु ष्ठेवनीयम्। ष्ठेवनम्। ष्ठेवः। ष्ठेवकः। ष्ठेवी। ष्ठेवितः। ष्ठूतः। ष्ठूतिः ष्ठेवितुम् ष्ठेवितव्यम्। ष्ठेवित्वा ष्ठूत्वा। ष्ठेव्यम्। ष्ठीव्यन् ष्ठीव्यमानः। ष्ठेवि-ष्यन् ष्यमाणः।

सन्ज सङ्गे भ्वा० पर० अक० अनिट्।

कर्तरि सजति। सजेत्। सजतु। असजत्। असाङ्क्षीत्। ससञ्ज ससजतुः ससञ्जतुः सङ्क्ता। सज्यात्। सङ्क्ष्यति। भावे सज्यते। असञ्जि। णिचि सञ्जयति-ते अससञ्जत्-त सनि सिसङ्क्षति। यङि सासज्यते।

क्तादुसु सञ्जनीयम्। सञ्जनम्। सङ्गः। सञ्जकः। घिण्ण्यन् सङ्गी। सङ्क्ता। सक्तः। सक्तिः। सङ्क्तव्यम्। स्वङ्क्तुम्। सङ्क्ता। प्रसज्य सञ्जम्। सजन्। सङ्क्ष्यन्। प्र—प्रसङ्गे प्रसजति। प्रसङ्गः अनु—अनुषङ्गे अनुषजति अनुषङ्गः अभि—अभिषङ्गे—(पराभवे) अभिषजति।

Digitized by Google

षद्ऌ विषादे अक० आश्रयकरणे गतौ च सक०
तुदा० पर० अनिट् ।

कर्तरि सीदति । सीदेत् । सीदतु । असीदत् । असदत् । ससाद सेदतुः सेदिथ—ससत्थ सेदिव । सत्ता । सद्यात् । सद्यते कर्मणि भावे च सद्यते । असादि । णिचि सादयति-ते असीषदत्-त । कृत्सु सदनीयम् । सदनम् । सादः । सादकः । सादी । सत्ता सन्नः । सत्तिः । सत्तव्यम् । सत्तुम् । सत्त्वा । प्रसद्य । सद्यम् । सीदन् । सद्यमानः । सद्यमान स्थमानः । अधिसदः । मनि सद्म । प्र प्रसादे प्रसीदति प्रसन्नः । प्रसादः । वि—विषादे विषीदति विषण्णः विषादः । अव—अवसादे अवसीदति अवसन्नः अवसादः । उद्—उन्मूलने । उत्सीदति उत्सन्नः उत्सादः । आ—नैकट्ये आसीदति आसन्नः आसत्तिः ।

सहृ शक्तौ भ्वा० आत्म० सक० सेट् ।

कर्तरि सहते । सहेत । सहताम् । असहत । असहिष्ट । सेहे । सहितासे सोढासे । सहिषीष्ट । कर्मणि सह्यते । असाहि । णिचि साहयति-ते असीषहत्-त पर्य्यसीषहत्-त ।

कृत्सु सहनीयम् । सहनम् । साहः । दुःखसहः भारसहः । दुःषहः । साहकः । साही । इष्णु सहिष्णुः । सहिता सोढा सोढः । सोढि । सहितव्यं सोढव्यम् । सहितुं । सोढुम् ।

Digitized by Google

सोढ्वा। प्रसह्य। सह्यम्। सहमानः सह्यमानः। सहिष्यमाणः। उद्—उत्साहे उत्सहते उत्साहः।

सान्त्व सान्त्वने अद० चुरा० उभय० सक० सेट्।

कर्तरि सान्त्वयति-ते। असस्सान्त्वत्-त। कर्मणि सान्त्व्यते। असान्त्वि।

कृत्सु सान्त्वनीयम्। सान्त्वनम्। सान्त्वयिता। सान्त्वितः। सान्त्वना। सान्त्वयितव्यम्। सान्त्वयितुम्। सान्त्वयित्वा। प्रसान्त्व्य। सान्त्व्यम्। सान्त्वयन्-मानः सान्त्व्यमानः। सान्त्वयि-ष्यन् ष्यमाणः। कर्मणि सान्त्विष्यमाणश्च।

सि बन्धने स्वादिगणीयः क्र्यादि० च उभयपदी सकर्मकः अनिट्।

कर्तरि सिनोति—सिनाति सिनुतः—सिनीतः सिन्वन्ति—सिनन्ति सिनुते—सिनीते। सिनुयात्—सिनीयात् सिन्वीत—सिनीत। सिनोतु—सिनाति सिनुताम्—सिनीताम्। असिनोत्—असिनात्। असिनुत—असिनीत। असैषीत् असेष्ट। सिषाय सिष्ये। सेता-सि-से। सीयात् सेषीष्ट। सेष्यति-ते कर्मणि सीयते। असावि। णिचि साययति-ते असीषयत्-त।

कृत्सु सयनीयम्। सयनम्। सायः। सायकः। सायी। सेता। सितः ग्रासे सिनः। सितिः। सेतव्यम्। सेतुम्। सित्वा। प्रसित्य। सेयम्। सिन्वन् सिन्वानः सिनन्-सिनानः सीयमानः। से-ष्यन् ष्यमाणः कर्मणि सायिष्यमाणश्च। वि-विषये विषिणोति-विषिणाति विषयः।

Digitized by Google

सिच सेचने तु० उभ० सक० अनिट् मुचादि।

कर्तरि सिञ्चति सिञ्चतः सिञ्चन्ति सिञ्चते। सिञ्चेत्-त। सिञ्चतु तात्। असिञ्चत्-त न्यषिञ्चत्। असिचत्। असिचत—असिक्त। सिषेच चे निषिषेच चे। रुक्षा-सि से। सिच्यात् सिक्षीष्ट सेक्ष्य-ति-ते। कर्मणि सिच्यते। असेचि। णिचि सेचयति-ते असीषिचत्-त। सनि सिसिक्षति यङि सेसिच्यते।

कृत्सु सेचनीयम्। सेचनम्। सेकः। सेचकः। सेची। सेक्ता सिक्तः। सिक्तिः। सेक्तव्यम्। सेक्तुम्। सिक्त्वा। निषिच्य। सेच्यम्। सिञ्च-न् मानः सिच्यमानः। से-च्यन् च्यमाणः। नि—निषेके (गर्भाधाने) निषिञ्चति निषिक्तः निषेकः अभि-अभिषेके (मन्त्रपूर्वकस्नपनभेदे) अभिषिञ्चति अभिषिक्तः अभिषेकः। उद् गर्वे अक० उत्सिञ्चति उत्सिक्तः उत्सेकः।

सिध सिद्धौ दिवा० पर० अक० अनिट्।

कर्तरि सिध्यति। सिध्येत्। सिध्यतु। असिध्यत्। असैत्सीत्। सिषेध। सेद्धा। सिध्यात्। सेत्स्यति। भावे सिध्यते। असेधि। णिचि साधयति-ते असीषधत् त। सनि सिषाधयिषति।

कृत्सु। सेधनीयम्। सेधनम्। सेधः। सेधकः। सेधी। सेद्धा। सिद्धः। सिद्धिः। सेद्धव्यम्। सेद्धुम्। सिद्ध्वा। संसिध्य। सेध्यम्। सिध्यन्। सेत्स्यन्। णिचस्तु साध-

Digitized by Google

नीयम् साधनम्। साधकः। साधयिता। साधितः। साधना। साधयितव्यम्। साधयितुम्। साधयित्वा। प्रसाध्य। साध्यम्। साधय-न्-मानः साध्यमानः साधयि-य्यन् य्यमाणः। कर्मणि साधिय्यमाणश्च।

सिध गतौ भ्वादि० पर० सक० सेट्।

कर्तरि सेधति। असेधीत्। कर्मणि सिध्यते। असेधि। णिचि सेधयति-ते असीषिधत्-त।

कृत्सु सेधनीयम्। सेधनम्। सेधकः। सेधी। सेधिता। सिद्धः। सिद्धिः। सेधितव्यम् सेधितुम्। सेधित्वा—सिद्ध्वा। निषिद्ध्वा। सेध्यम्। सेधन् सिध्यमानः। सेधिय्यन् य्यमाणः। नि-निषेधे निषेधति निषिद्धः निषेधकः निषेधः। प्रति--निषेधे प्रतिषेधति प्रतिषिद्धः। प्रतिषेधः। आ—आसेधे (राजाज्ञयावरोधे) आसेधति आसेधः आसिद्धः। उद् उच्चतायाम् उत्सेधति उत्सिद्धः उत्सेधः।

सिव तन्तुसन्ताने दिवा० पर० सक० सेट्।

कर्तरि सीव्यति परिषीव्यति। सीव्येत् सीव्यतु। असीव्यत्। असेवीत्। सिषेव। परिषिषेव। सेवितासि। सीव्यात्। कर्मणि सीव्यते। असेवि। णिचि सेवयति ते असीषिवत्-त। सनि सिसेविषति सिस्यूषति। यङि सेषीव्यते।

कृत्सु सेवनीयम् सेवनम्। सेवकः। सेवी। सेविता। स्यूतः। स्यूतिः। सेवितव्यम्। सेवितुम्। सेवित्वा। स्यूत्वा।

Digitized by Google

आसीव्य। सेव्यम्। सीव्यन् सीव्यमानः। सेवि-व्यन् व्यमाणः।

सु मर्दने, स्नपने, मद्योत्पादने भ्वादिगणीयः उभ० सकर्मकः सेट्।

कर्तरि सुनोति सुनुतः सुन्वन्ति सुन्वः—सुनुवः सुनुते सुन्वे। सुनुयात् सुन्वीत। सुनोतु सुनुताम्। असुनोत् असुनुत। असावीत् असविष्ट-असोष्ट। सुषाव सुषुवतुः सुषविथ सुषुवे। सवितासि-से-सोतासि-से। सूयात् सविषीष्ट-सोषीष्ट। सविष्यति-ते सोष्यति-ते। कर्मणि सूयते। असावि। णिचि साक्यति-ते असीषवत्-त।

छत्सु। सवनीयम्। सवनम्। सवः। सावः। सावकः। सावी सविता-सोता। सुतः। सुतिः। सवितुम्-सोतुम्। सवितव्यम्-सोतव्यम्। सुत्वा। वनिप् सुत्वा सुत्वानौ। अभिषुत्य। सव्यं साव्यम्। सुन्वन् सुन्वानः सूयमानः। सविष्यन् ष्यमाणः-सोष्यन् माणः कर्मणि साविष्यमाणश्च। अभि अभिषवे अभिषुणोति सोमं निष्पीड़यति स्नाति वेत्यर्थः अभिषुतः।

सू प्रसवे अदा० आत्म० सक० वेट्।

कर्तरि सूते। सुवीत। सूताम् सुवै सुवावहै सुवामहै। असूत। असविष्ट-असोष्ट। सुषुवे सुषुविषे-सुषूषे। सोता-सविता। सविषीष्ट-सोषीष्ट। कर्मणि। सूयते। असावि। णिचि सावयति-ते असीषवत्-त।

Digitized by Google

कृत्सु सवनीयम्। सवनम्। सवः। सावकः। सावी। सविता-सोता। सूनः। सूतिः। सवितव्यम्-सोतव्यम्। सवितुम् सोतुम्। सूत्वा। प्रसूय। सव्यम् साव्यम्। सुवानः सूयमानः। सविष्यमाणः सोष्यमाणः कर्मणि साविष्यमाणश्च।

षू प्रसवे दिवा० आत्म० सक० वेट्।

कर्तरि सूयते। असविष्ट-असोष्ट। सुषुवे सुषुविषे सुषूषे। सोता-सविता। अन्यत् सर्वं अदादिगणीयवत्। निष्ठायां सूनः। सूनवान्। धानचि। सूयमानः इति भेदः।

सूच सूचने अद० चुरा० उभ० सक० सेट्।

कर्तरि सूचयति-ते। असुसूचत्-त। कर्मणि सूच्यते असूचि असूचिषाताम् असूचयिषाताम्।

कृत्सु। सूचनीयम्। सूचनम्। सूचकः। सूची। सूचयिता सूचितः। सूचना। सूचयितव्यम्। सूचयितुम्। सूचयित्वा। संसूच्य। सूच्यम्। सूचयन् मानः सूच्यमानः। सूचयिष्यन् ष्यमाणः कर्मणि सूचिष्यमाणश्च।

सूद आस्रवे क्षरणे च चुरा० उभ० अक० सेट्।

कर्तरि सूदयति-ते। असूषूदत् त। कर्मणि सूद्यते। असूदि असूदिषाताम् असूदयिषाताम्।

कृत्सु। सूदनीयम्। सूदनम्। मधुसूदनः। बलसूदनः।

Digitized by Google

स्तृदकः। स्तृदी। स्तृदयिता। स्तृदितः। स्तृदना। स्तृदयितव्यम्। स्तृदयितुम्। स्तृदयित्वा। संस्तृद्य। स्तृद्यम्। स्तृदयन् मानः स्तृद्यमानः। स्तृदयिष्यन् ष्यमाणः कर्मणि स्तृदिष्यमाणश्च।

स्तृ गतौ भ्वा० पर० सक० अनिट्।

कर्तरि सरति। सरेत्। सरतु। असरत्। असरत् असार्षीत्। ससार ससर्थ सस्रव। सर्त्तासि। स्रिष्यत्। सरिष्यति। कर्मणि स्रियते। असारि। णिचि सारयति-ते। असीसरत्-त। सनि सुस्तूर्षति।

स्तृत्सु सरणीयम्। सरणम्। सरः। अभिसारः सारकः। सारी। सर्त्ता। स्तृतः। स्तृतिः। सर्त्तव्यम्। सर्त्तुम्। स्तृत्वा। उपस्तृत्य। सार्थम्। सरन् स्रियमाणः। सरिष्यन् ष्यमाणः कर्मणि सारिष्यमाणश्च। प्र—प्रसारे प्रसरति प्रस्तृतः प्रसारः। अप—अपसरणे अपसरति अपस्तृतः अपसरणम् अपसारः। सम्-संसरणे (स्वाद्यष्टजन्यदेहधारणे) संसरति संस्तृतिः संसारः। अनु—अनुसरणे। अनुसरति अनुस्तृतः अनुसरणम् अनुसारः। वि—विसारे विसरति। विस्तृतः विसरणम् विसारः। अभि अभिसारे (कान्तार्थितया संकेतस्थानगमने। अभिसरति अभिसारिका अभिसारः। उद्—उत्सरणे (दूरीभवने) अक० उत्सरति उत्स्तृतः उत्सरणम्। णिचः उत्सारयति ते उत्सारितः उत्सारणा।

Digitized by Google

सृज विसर्गे तुदा० पर० सक० अनिट्।

कर्तरि स्रजति। परिस्रजति। स्रजेत्। स्रजतु। अस्रजत्। अस्राक्षीत्। ससर्ज ससर्जिथ-सस्रष्ठ सस्रजिव। स्रष्टा। स्रक्ष्यात्। स्रक्ष्यति। कर्मणि स्रज्यते असर्जि अस्रक्षाताम् णिचि सर्जयति असीस्रजत्-त अससर्ज्जत्-त। सनि सिस्रक्षति। अन्वित्ते कर्तरि आत्मनेपदी दैवादिकस्रजवत् स्रज्यते इत्यादि तनि-विण्-च असर्जि।

कृत्सु सर्जनीयम्। सर्जनम्। सर्गः। विसृज् संसर्गे। स्रष्टा। स्रष्टः। स्रष्टिः। स्रष्टव्यम्। स्रष्टुम्। स्रष्ट्वा। विस्रज्य। सर्ज्यम् स्रज्यम्। स्रजन् स्रज्यमानः स्रक्ष्यन् स्रक्ष्यमाणः। सम् संसर्गे दिवादि० अक० संस्रज्यते। उद्-दाने सक० उत्स्रजति उत्सर्गः उत्सृष्टः।

स्रप गतौ भ्वा० पर० सक० अनिट्।

कर्तरि सर्पति अभिसर्पति। सर्पेत्। सर्पतु। असर्पत्। असाप्सीत्-असार्प्सीत् अस्रपत्। ससर्प ससर्पिथ सस्रपिव। स्रप्ता-सर्प्ता। स्रप्स्यात्। सर्प्स्यति स्रप्स्यति। कर्मणि स्रप्यते। असर्पि असर्पिषाताम्-अस्रप्साताम्। णिचि सर्पयति-ते असीस्रपत्-त-असससर्पत्-त।

कृत्सु सर्पणीयम्। सर्पणम्। सर्पः। सर्पी। स्रप्ता-सर्प्ता। स्रप्तः। स्रप्तिः। सर्प्तव्यम् स्रप्तव्यम्। सर्प्तुम्-स्रप्तुम्। स्रप्त्वा। संस्रप्य। स्रप्यम् सर्प्यम् स्रप्यमाणः। स्रप्स्यन् मानः-सर्प्स्यन् मानः। उद् उल्लङ्घने उत्सर्पति। अप-अपयाने अपसर्पति। सम्-समन्तात् गतौ व्याप्तौ च संसर्पति।

Digitized by Google

सो नाशे दिवा० पर० अक० अनिट्।

कर्तरि स्यति परिस्यति। स्येत्। स्यतु। अस्यत्। असात्। असासीत्। ससौ। सस्थिथ ससाथ—सस्विव। साता। सेयात्। सास्यति। भावे सीयते। असायि असायिषाताम्-असासाताम्। णिचि सापयति-ते असीषपत्-त।

कृत्सु। सानीयम्। सानम्। सायः। सायकः। सायी साता सितः। सितिः। सातव्यम्। सातुम्। सित्वा। अवसाय। सेयम्। स्यन्। सास्यन्। अव-समाप्तौ अवस्यति अवसायः अवसानम्। वि अव उद्यमे बोधे च सक० व्यवस्यति व्यवसीयते व्यवसायः। अनु-वि-अवबुद्धस्य पुनर्बोधे अनुव्यवस्यति अनुव्यवसायः।

स्कन्द् गतौ शोषणे च भ्वा० पर० सक० अनिट्।

कर्तरि स्कन्दति। स्कन्देत्। स्कन्दतु। अस्कन्दत्। अस्कदत् अस्कांत्सीत्। चस्कन्द। स्कन्तासि। स्कद्यात् स्कंत्स्यति। कर्मणि स्कद्यते। अस्कन्दि। चस्कदे चस्कन्दे। णिचि स्कन्दयति-ते अचस्कन्दत् त।

कृत्सु स्कन्दनीयम्। स्कन्दनम्। स्कन्दः। स्कन्दी। स्कन्दकः स्कन्ता। स्कन्नम्। स्कन्तिः। स्कन्तव्यम्। स्कत्तुम्। स्कन्त्वा। आस्कन्द्य। स्कन्द्यम्। स्कन्दन् स्कद्यमानः। आ—आस्कन्दने आङुत्य गतौ इदित् तेन न नलोप आत्म० आस्कन्दते आस्कन्दितम्। आचस्कन्दे। आस्कन्द्यते। अव-अवरोधने अवस्कन्दति। अवस्कन्दः।

Digitized by Google

स्खल चलने भ्वा० पर० सक० सेट् वा घटादि।

कर्तरि स्खलति। अस्खालीत्। चस्खाल भावे स्खल्यते। अस्खालि णिचि स्खलयति ते स्खालयति ते।

कृत्सु स्खलनीयम्। स्खलनम्। स्खालः। स्खालकः। स्खलिता स्खलितः। स्खलितव्यम्। स्खलितुम्। स्खलित्वा। स्खलन् स्खलिष्यन् ष्यमाणः।

स्तन्भ स्तम्भने सौत्रः पर० सक० सेट्।

कर्तरि स्तन्भाति—स्तम्भोति स्तम्भुतः—स्तम्भीतः स्तम्भुवन्ति-स्तम्भन्ति स्तम्भीयात्—स्तम्भुयात्। स्तम्भातु—स्तम्भोतु। अस्तम्भीत्—अस्तम्भात्। अस्तभत्-अस्तम्भीत्। तस्तम्भ। तस्तभतुः—तस्तम्भतुः। स्तम्भिता। स्तम्भ्यात्। कर्मणि स्तभ्यते। अस्तम्भि णिचि स्तम्भयति ते। अतस्तम्भत् त। विष्टम्भाति व्यष्टभत्। णिचः व्यतस्तम्भत् त।

कृत्सु स्तम्भनीयम्। स्तम्भनम्। स्तम्भः। स्तम्भकः। स्तम्भी। स्तम्भिता स्तब्धः। स्तब्धिः। स्तम्भितव्यम्। स्तम्भितुम्। स्तम्भित्वा स्तब्ध्वा। स्तम्भाम्। स्तभ्नन्। स्तभ्नुन्। स्तभ्यमानः स्तम्भिष्यन् ष्यमाणः।

सु स्तवने अदादिगणीयः उभयपदी सकर्मकः अनिट्। तादावार्द्ध धातुके वेडित्यन्ये।

कर्तरि स्तौति स्तवीति। सुवीतः मतान्तरे सुतः। अस्तौत व्यस्तौत् व्यष्टौत् पक्षे ईट् एवं वेः परेश्च। अस्तौषीत् अस्तुत। तुष्टाव। तुष्टविथ-तुष्टोथ तुष्टुविव तुष्टुवे। स्तोता-

Digitized by Google

सि से स्रवितासि से। स्रूयात् स्रोषीष्ट। स्रोष्यति ते। कर्मणि स्रूयते। अस्रावि णिचि स्रावयति-ते अतुष्टवत्-त।

कृत्सु स्रवनीयम्। स्रवनम्। स्रवः। स्रावकः। स्रावी। स्रविता स्रोता। स्रुतः। परिष्टुतः। स्रुतिः। स्रोतव्यम् स्रवितव्यम्। स्रुत्वा। प्रस्रुत्य। स्रुत्यम्। स्रुवन् स्रूयमानः। स्रोष्यन् ष्यमाणः कर्मणि स्राविष्यमाणश्च। प्र—प्रस्रावे प्रस्रवीति प्रस्रुतः। प्रस्रावः।

स्तृ आवरणे स्वादि० उभ० सक० अनिट्।

कर्तरि स्तृणोति स्तृणुतः स्तृण्वन्ति स्तृण्वः स्तृणुवः स्तृणुमः। स्तृणुयात् स्तृण्वीत। स्तृणोतु स्तृणुताम्। अस्तृणोत् अस्तृणुत। अस्तार्षीत् अस्तृत। तस्तार तस्तरतुः तस्तर्थ तस्तरिव तस्तरे। स्तर्त्तासि से। स्तर्य्यात्। स्तृषीष्ट। स्तरिष्यति ते। कर्मणि स्तर्य्यते। अस्तारि अस्तारिषाताम् अस्तृषाताम्। णिचि स्तारयति ते अतस्तरत्-त। यङि तास्तर्य्यते।

कृत्सु स्तरणीयम्। स्तरणम्। स्तरः। विष्टरः आरुने संस्तरः अवस्तरः। विस्तरः शब्दसमूहे अन्यत्र विस्तारः। स्तारकः। स्तारी। स्तर्त्ता। स्तृतः। स्तृतिः। स्तर्त्तव्यम्। स्तृत्वा। विस्तृत्य। स्तार्य्यम्। स्तृण्वन् स्तृण्वानः स्तार्य्यमाणः। स्तरिष्य-न् ष्यमाणः कर्मणि स्तारिष्यमाणश्च। वि—विस्तारे विस्तृणाति विस्तरः। सम्-संस्तरे संस्तृणाति संस्तृतः।

Digitized by Google

ष्ठा गतिनिरोधे भ्वा० अक० पर० अनिट्।

कर्तरि तिष्ठति। तिष्ठेत्। तिष्ठतु। अतिष्ठत्। अस्थात्। व्यष्ठात्। तस्थौ नितष्ठौ। स्थाता। स्थेयात्। स्थास्यति। भावे। स्थीयते अस्थायि। णिचि स्थापयति-ते निष्ठापयति। अतिष्ठिपत्-त। सनि तिष्ठासति यङि तेष्ठीयते।

कृत्सु स्थानीयम्। स्थानम्। स्थायः। स्थायी। स्थाता। स्थितः। स्थितिः। आस्था। स्थातव्यम्। स्थातुम्। स्थित्वा। स्थेयम्। तिष्ठन्। स्थास्यन्। क्तु तस्थिवान् वितष्ठिवान्। स्नु-स्थास्नुः। प्रतिज्ञायाम् निर्णयार्थावलम्बने स्वाभिप्रायप्रकाशने च आत्म० पृथिव्यां गन्तुमातिष्ठते प्रतिजानीते। विवादे संशय्य तिष्ठते निर्णयार्थमवलम्बते। पत्ये तिष्ठते कामिनी पतिमुद्दिश्य स्वाभिप्रायं प्रकाशयति। सम् वि-अव-आत्म० संतिष्ठते वितिष्ठते अवतिष्ठते। प्र-प्रस्थाने आत्म० प्रतिष्ठते। प्रति-प्रतिष्ठायां प्रतितिष्ठति प्रतिष्ठितः। अधि-अधिष्ठाने अधितिष्ठति अधिष्ठितः। उद्-उत्थाने उत्तिष्ठति अनूर्द्ध्वचेष्टायान्तु आत्म० विद्यायामुत्तिष्ठते यतते इत्यर्थः।

ष्ठा शोधने अदा० पर० सक० अनिट्।

कर्तरि स्थाति अभिष्थाति। स्थायात्। स्थातु। अस्थात्। अस्थासीत्। सस्थौ सस्थिथ-सस्थाथ। स्थाता। स्थेयात्-स्थायात्। स्थास्यति। भावे स्थायते। अस्थायि। णिचि स्थापयति-ते वा षटादित्वे स्थपयति ते। अस्थिषणपत्।

Digitized by Google

कृत्सु स्नानीयम्। स्नानम्। स्नायः। स्नायकः। स्नायी। स्नाता। स्नातः अभिस्नातः निस्नातः। नदीस्नातः कुण्डले। स्नातिः। स्नातव्यम्। स्नातुम्। स्नात्वा। उपस्नाय। स्नेयम्। स्नान् स्नास्नन्।

स्निह प्रीतौ दिवा० पर० अक० वेट्।

कर्तरि। स्निह्यति परिस्निह्यति। स्निह्येत्। स्निह्यतु अस्निह्यत्। अस्निहत्। सिष्णेह। स्नेहिता--स्नेढा। स्निह्यात्। स्नेहिष्यति--स्नेक्ष्यति। भावे स्निह्यते। अस्नेहि। णिचि स्नेहयति-ते असिस्निहत्-त।

कृत्सु स्नेहनीयम्। स्नेहनम्। स्नेहः। स्नेही। स्नेहिता—स्नेग्धा स्नेढा स्नीढः स्निग्धः। स्नेग्धव्यम्—स्नेहितव्यम् स्नेढव्यम्। स्नीढ्वा स्निग्ध्वा। संस्निह्य। स्नेह्यम्। स्निह्यन्। स्नेहिष्यन्--स्नेक्ष्यन्। उदू क्विप् नि० उष्णिक्।

स्नु स्रवणे अदा० पर० अक० सेट्।

कर्तरि स्नौति परिस्नौति स्नुतः स्नुवन्ति। स्नुयात्। स्नौतु। अस्नौत्। अस्नावीत्। सुष्णाव सुष्णविथ सुष्णुविव। स्नविता। स्नूयात्। स्नविष्यति। भावे स्नूयते। अस्नावि। णिचि स्नावयति-ते असुष्णवत्-त।

कृत्सु स्नवनीयम्। स्नवनम्। स्नवः। स्नावकः। स्नावी। स्नविता। स्नुतः परिस्नुतः। स्नुतिः। स्नवितव्यम्। स्नवितुम्। स्नुत्वा। अपस्नुत्य। स्नाव्यम्। स्नव्यम्। स्नुवन्। स्नविष्यन्।

Digitized by Google

स्यन्द ईषत्कम्पे भ्वा० आत्म० अक० सेट्।

कर्तरि स्यन्दते। असस्यन्दिष्ट। पस्यन्दे। भावे स्यद्यते अस्यन्दि। णिचि पर० स्यन्दयति। अपस्यन्दत्।
कृत्सु स्यन्दनीयम्। स्यन्दनम्। स्यन्दः। स्यन्दकः। स्यन्दी। स्यन्दिता। स्यन्दितः। स्यन्दा। स्यन्दितव्यम्। स्यन्दितुम्। स्यन्दित्वा। निस्यद्य। स्यन्द्यम्। स्यन्दमानः स्यन्द्यमाणः। निस् निस्यन्दे। निस्यन्दते निस्यन्दः।

स्पर्ध हर्षे भ्वा० आत्म० अक० सेट्।

कर्तरि स्पर्धते। अस्पर्धिष्ट। पस्पर्धे। स्पर्ध्यते। भावे स्पर्ध्यते अस्पर्धि। णिचि स्पर्धयति-ते अपस्पर्धत्-त।
कृत्सु स्पर्धनीयम्। स्पर्धनम्। स्पर्धः। स्पर्धकः। स्पर्धी। स्पर्धिता। स्पर्धितः। स्पर्धा। स्पर्धितव्यम्। स्पर्धितुम्। स्पर्धित्वा। आस्पर्ध्य। स्पर्ध्यम्। स्पर्धमानः। स्पर्ध्यमाणः। आ—आस्फालने आस्पर्धते। आस्पर्धा।

सृग्र स्पर्धने तु० पर० सक० अनिट्।

कर्तरि सृग्रति। सृग्रेत्। सृग्रतु। असृग्रत्। असाक्षीत्-असार्क्षीत्-असृक्षत्। पस्सर्ग्र पस्सर्ग्रिथ पस्सृग्रिव। स्रष्टा--स्रष्टा। सृग्र्यात्। स्रक्ष्यति---स्रक्ष्यति। कर्मणि स्रग्र्यते। अस्सर्ग्रि। णिचि स्रग्रयति-ते अपस्सर्ग्रत्-त अपस्सृग्रत् त। णिजन्तस्तु दानेऽर्थेऽपि।
कृत्सु स्रग्रनीयम्। स्रग्रनम्। णिचः स्रग्रनम् दानमित्यर्थः।

Digitized by Google

स्पर्शः स्पर्शकः। स्पर्शी। स्प्रष्टा स्पर्ष्टा। सृष्टः। सृष्टिः। स्प्रष्टव्यम् स्पर्ष्टव्यम्। स्प्रष्टुम्। स्पर्ष्टुम्। सृष्ट्वा। उपसृत्य। स्पर्श्यम्। सृजन् सृज्यमानः। स्प्रक्षन् स्प्रक्ष्यमाणः स्पर्क्षन् माणः। उप आचमने उपस्पृशति।

स्पृह इच्छायाम् अदन्त चुरा० उभ० सक० सेट्।

कर्तरि स्पृहयति ते। अपस्पृहत् त। कर्मणि स्पृह्यते। अस्पृहि।

क्तत्सु स्पृहणीयम्। स्पृहणम्। स्पृहकः। स्पृहयिता। स्पृहितः। क्विन् नास्ति अस्पृहा। स्पृहयितव्यम्। स्पृहयितुम्। स्पृहयित्वा। उपस्पृह्य। स्पृह्यम्। स्पृहयन्। माणः स्पृह्यमाणः। स्पृहयिष्यन् ष्यमाणः। कर्मणि स्पृहिष्यमाणश्च।

स्फुट विदारणे प्रकाशे च तु० पर०
अक० अनिट् कुटादि।

कर्तरि स्फुटति। अस्फुटीत्। पुरस्फोट। भावे स्फुट्यते अस्फोटि। णिचि स्फुटयति ते।

क्तत्सु स्फुटनीयम्। स्फुटनम्। स्फोटः स्फोटकः। स्फोटी। स्फुटिता। स्फुटितः। स्फुट्टिः। स्फुटितव्यम्। स्फुटितुम्। स्फुटित्वा। संस्फुट्य। स्फुटन् स्फुटिष्यन्।

स्फुर स्फूर्तौ तुदा० पर० सेट् कुटादि।

कर्तरि स्फुरति सर्वं स्फुटवत्। नि-वि वा षत्वम् निष्फुरति निस्फुरति विस्फु (ष्फु) रति इतिभेदः। एवं स्फुल।

Digitized by Google

ष्णा विस्मये भ्वा० आत्म० अक० अनिट्।

कर्त्तरि स्नायते विस्मयते। अस्नेष्ट। सिस्निधे। भावे स्नीयते। अस्नायि। णिचि स्नाययति कर्त्तृतो विस्मये आत्म० अच आत् पुक् च विस्नापयते।

कृत्सु। स्नायनीयम्। स्नयनम् स्नायः। स्नायकः। इनि स्नायी विस्नायी। स्नेता। स्नातः स्नातिः। स्नेतव्यम्। स्नात्वा। विस्नित्य। स्नेयम्। स्नायमानः। स्नेष्यमाणः।

स्मृ स्मरणे भ्वा० पर० सक० अनिट् घटादिर्वा।

कर्तरि स्मरति। स्मरेत्। स्मरतु। अस्मरत्। अस्मार्षीत्। सस्मार सस्मरतुः सस्मर्थ सस्मरिव। स्मर्त्ता। स्मर्य्यात्। स्मरिष्यति। कर्मणि स्मर्य्यते। अस्मारि। णिचि स्मारयति ते असस्मरत्-त। घटादिपक्षे स्मरयति इतिभेदः।

कृत्सु स्मरणीयम्। स्मरणम्। स्मरः। स्मारकः स्मारी। स्मर्त्ता। स्मृतः। स्मृतिः। स्मर्तव्यम्। स्मर्तुम्। विस्मृत्य। स्मार्य्यम्। स्मरन्। स्मर्य्यमाणः। स्मरिष्यन् ष्यमाणः। कर्मणि स्मारिष्यमाणश्च। वि—विस्मरणे विस्मरति। विस्मृतिः विस्मरणम्।

स्यन्द् चरणे भ्वा० आत्म० अक० वेट् दृतादि लुङि लटि लङि च उभ०।

कर्तरि स्यन्दते निष्यन्दते-निस्यन्दते घृतम्। एवं परि-निर्-वि-अभि-अनु वा षत्वम्। निस्यन्दते इस्ती। नस्यन्देते मत्स्योदके। अस्य-दत् अस्यन्दिष्ट-अस्यन्त।

Digitized by Google

सस्यन्दे सस्यदे। स्यन्दितासे-स्यन्तासे। स्यन्दिषीष्ट-स्यन्त्सीष्ट। सन्त्स्यति स्यन्दिष्यते। असस्यत्स्यत् असस्यन्दिष्यत। भावे स्यद्यते। असस्यन्दि। णिचि स्यन्दयति-ते। असिस्यन्दत्-त।

कृत्सु स्यन्दनीयम्। स्यन्दनम्। स्यन्दः। स्यन्दकः। स्यन्दी। निष्यन्दी। स्यन्दिता-स्यन्ता। स्यन्दः। स्यन्तिः। स्यन्दितव्यम्-स्यन्तव्यम्। स्यन्दितुम्-स्यन्तुम्। स्यन्त्वा। निष्यन्द्य। स्यन्द्यम्। स्यन्दमानः। स्यद्यन् स्यन्दिष्यमाणः।

स्वनृस भ्रंशे भ्वा० आत्म० अक० सेट्।

कर्तरि स्वंसते। लुङि उभ० असस्वसत् असंसिष्ट। सस्वंसे--सस्वसे। स्वंसिषीष्ट। स्वंसिष्यते भावे स्वस्यते। असस्वंसि। णिचि स्वंसयति ते असस्वंसत्-त।

कृत्सु स्वंसनीयम्। स्वंसनम्। स्वंसः। स्वंसकः। स्वंसी। स्वंसिता। स्वस्तः। स्वस्तिः। स्वंसितुम्। स्वंसितव्यम्। स्वंसित्वा स्वस्त्वा। विस्वस्य। स्वंस्यम्। स्वंसमानः। स्वंसिष्यमाणः।

स्वनृज आलिङ्गने भ्वादि० आत्म० सक० अनिट्।

कर्तरि स्वजते विष्वजते अस्वङ्क्त न्यष्वङ्क्त--न्यस्वङ्क्त एवं वेः। सस्वजे--सस्वङ्क्षे विसस्वजे। स्वङ्क्षीष्ट। स्वङ्क्षीष्ट। स्वङ्क्ष्यते। कर्मणि स्वज्यते। असस्वञ्जि। णिचि स्वञ्जयति-ते असिष्वञ्जत् त।

Digitized by Google

कृत्सु स्वञ्जनीयम्। स्वञ्जनम्। स्वङ्गः। निष्वङ्गः। स्वञ्जकः। घिणुन् परिष्वङ्गी। स्वङ्गा। स्वक्तः। स्वङ्क्तव्यम् स्वङ्क्तुम्। स्वक्ता। परिष्वज्य। स्वजमानः। स्वज्यमानः। स्वङ्क्तमाचः।

स्वप शयने अदादि० पर० अक० अनिट् वेदादिश्च।

कर्त्तरि स्वपिति स्वपितः स्वपन्ति स्वपिषि स्वपिथः स्वपिथ स्वपिमि स्वपिवः। स्वप्यात्। स्वपितु स्वपिताम् स्वपन्तु स्वपिहि। अस्वपीत् अस्वपत् अस्वपिताम् अस्वपन् अस्वपीः अस्वपः। अस्वाप्सीत्। सुष्वाप। सुषुपतुः। विसुष्वाप विसुषुपतुः सुष्वपिथ सुष्वप्थ सुषुपिव। स्वप्ता। सुप्यात्। स्वप्स्यति। भावे सुप्यते। अस्वापि। णिचि स्वापयति-ते अससिष्वपत्-त। सनि सुषुप्सति। णिचः सनि सुष्वापयिषति ते।

कृत्सु स्वपनीयम्। स्वपनम्। स्वापः। स्वापकः। स्वापी। स्वप्ता। सुप्तः। सुषुप्तः। सुप्तिः। स्वप्तव्यम्। स्वप्तुम्। सुप्ता। विसुप्य स्वप्यम्। स्वपन् स्वप्यन्। न स्वप्तः नञ स्वप्नक्।

हन हिंसायां गतौ च अदा० पर० सक० अनिट्।

कर्त्तरि हन्ति प्रविहन्ति हतः घ्नन्ति हंसि हथः हथ हन्मि प्रहस्वः—प्रहन्वः प्रहस्मः—प्रहन्मः। हन्यात् हन्तु हताम् घ्नन्तु जहि। अहन् अहताम् अघ्नन्। अवधीत् अवधिष्टाम् अवधिषुः। जघान जघ्नतुः जघ्नुः। जघनिञ्जघन्थ जघ्निव। हन्ता। वध्यात्। हनिष्यति। कर्मणि

Digitized by Google

हन्यते । अवधि-अघानि अघानिषाताम्-अवधिषाताम् । जघ्ने । घानिता—अहसाताम्—हन्ता । वधिषीष्ट । घानिष्यते-हनिष्यते । णिचि घातयति-ते अजीघतत्-त । सनि जिघांसति । यङि जेघ्नीयते जङ्घन्यते ।

कृत्सु हननीयम् । हननम् । वधः । घातः । ङ तमोपहः शोकापहः । क्त रुजघ्नः रोगघ्नः । घातकः । घाती । उकञ् घातुकः । हन्ता । हतः । हतिः । हन्तव्यम् । हन्तुम् । हत्वा । प्रहत्य । घात्यम् । घ्नन् घ्नतुं निघ्नानः हन्यमानः । हनिष्यन् घ्यमाणः कर्मणि घानिष्यमाणश्च । क्विप् वृत्रहा । क्त्वसु जघ्निवान् जघन्वान् । परा पराहृती पराहन्ति पराहतः पराहतिः । सम्-संघाते संहन्ति संहतः संघातः । वि—विघाते विहन्ति विहन्यते विहतः विघातः । उद्—उद्घाते उद्घन्ति उद्घतः उद्घातः । प्रति—प्रतिघाते प्रतिहन्ति प्रतिहन्यते प्रतिहतः प्रतिघातः । अभि—आ—आघाते अभिहन्ति अभिहतः अभिघातः आहन्ति । आहतः आघातः । वि—आ—व्याघाते व्याहन्ति व्याहतः व्याघातः ।

हस हासे भ्वादि० पर० अक० सेट् ।

कर्तरि हसति । हसेत् । हसतु । अहसत् । अहसीत् । अहास । भावे हस्यते । अहासि । णिचि हासयति-ते अजीहसत्-त ।

कृत्सु । हसनीयम् । हसनम् । हास्यः । हासकः । हसिता । हसितः । हसितिः । हसितव्यम् । हसितुम् । हसित्वा ।

Digitized by Google

उपहस्य। हास्यम्। हसन्। हसित्वा। उप उप-हासे (हास्यपूर्व्वकनिन्दने) सक० उपहसति उपहास्यः उपहसितः।

हा त्यागे जुहो० पर० सक० अनिट।

कर्त्तरि जहाति जहीतः-जहितः जहति जहासि जहीथः जहिथ जहामि जहीवः-जहिवः। जह्यात्। जहातु जहीताम्-जहिताम्-जहतु जहीहि-जहिहि-जहाहि। अजहात्। अहासीत्। जही जहतुः जहिथ-जहाथ। हाता। हास्यात्। हास्यति। कर्म्मणि हीयते अहायि। णिचि हापयति-ते अजीहपत्-त।

कृत्सु हानीयम्। हानम् प्रहाणम्। हायनो व्रीहिर्वर्षं च। हायः। हायकः। हायी। हाता। हीनः। हानिः। हातव्यम्। हातुम्। हित्वा। प्रहीय। हेयम्। जहत् हीयमानः। हा-स्यन् स्यमानः। कर्म्मणि हायिष्यमाणश्च।

हा गतौ जुहो० आत्म० सक० अनिट्।

कर्त्तरि जिहीते जिहाते जिहते। जिहीषे जिहाथे जिहीध्वे जिहे। जिहीत। जिहीताम्। अजिहीत। अहास्त। जहे। हातासे। हासीष्ट। हास्यते। कर्म्मणि हायते। अहायि। णिचि हापयति-ते अजीहपत्-त।

कृत्सु हानम्। हानिः। हात्वा। प्रहाय। हेयम्। जिहानः हायमानः। हास्यमानः। कर्म्मणि हायिष्यमाणश्च।

Digitized by Google

इति भेदः अन्यत् पूर्ववत् उद्—उद्वये उज्जिहीते उज्जिहाते।

हि वर्धने गतौ स्वा० पर० सक० अनिट्।

कर्तरि हिनोति प्रहिणोति हिनुतः हिन्वन्ति हिनोषि हिन्वः हिनुवः। हिनुयात्। हिनोतु। हिनु हिनवानि। अहिनोत्। अहैषीत्। जिघाय जिघ्यतुः जिघयिथ—जिघेथ। हेता। हीयात्। हेष्यति। कर्मणि हीयते। अहायि। णिचि हाययति-ते अजीहयत्-त। जत्सु हयनीयम्। हयनम्। हयः। हायकः। हायी। हेता। हितः। हितिः। हेतुम्। हेतव्यम्। हित्वा। संहित्य। हेयम्। हिन्वन् हीयमानः। हे-घ्नन् घ्नमाणः। कर्मणि हायिष्यमाणस्य। प्र—प्रेरणे प्रहिणोति प्रहितः।

हिंस हिंसने वा चुरा० उभय० पचे दधा० पर० सक० सेट् इदित्।

कर्तरि हिंसयति-हिनस्ति हिंसयतः-हिंस्तः हिंसयते। हिंसयेत्-त हिंस्यात्। हिंसयतु ताम् हिनस्तु। हिंसयस्व हिंसान। अहिंसयत्-त अहिनः। अजिहिंसत्-त अहिंसीत्। हिंसयाम्-बभूव आस चकार जिहिंस। हिंसयितासि-से हिंसितासि। कर्मणि हिंस्यते अहिंसि। अहिंसिषाताम्। अहिंसयिषाताम्।

जत्सु हिंसनीयम्। हिंसनम्। हिंसः। हिंसकः। हिंसी हिंसयिता हिंसिता। हिंसितः। हिंसना हिंसा। हिंसयितव्यम् हिंसितव्यम्। हिंसयितुम्। हिंसितुम्।

Digitized by Google

हिंसयित्वा हिंसित्वा। उपहिंस्य हिंस्यम्। हिंसय-न्-मानः हिंसन् हिंस्यमानः। हिंसयि-यन् यमानः हिंसिषयन् षयमाणः।

हु होमे जु॰ पर॰ सक॰ अनिट्।

कर्त्तरि जुहोति जुहुतः जुह्वति जुहोषि जुहुथः जुहोमि जुहुव। जुहुयात्। जुहोतु जुह्वतु जुहुधि जुहवानि। अजुहोत्। अहौषीत्। जुहाव जुहुवतुः जुहुविथ-जुहोथ जुहुविव। पक्षे जुहवाम् बभूव-आस-चकार इत्यादि। होता। हूयात् होषीष्ट। होषति। कर्म्मणि हूयते। अहावि। णिचि हावयति ते अजूहवत्-त।

कृत्सु हवनीयम्। हवनम् हवः। हानः। हावनः। हावी। असिहविः। हुण् होत्रम्। होता। हुतः। हुतिः। होतव्यम्। हुत्वा। प्रहुत्य। हव्यम्। हाव्यम्। जुह्वत् हूयमाणः। होषन् षमाणः कर्मणि हाविषयमाणश्च।

हृ हरणे भ्वा॰ उभय॰ द्विक॰ अनिट्।

कर्त्तरि हरति-ते। हरेत्-त। हरतु-ताम्। अहरत्-त। अहार्षीत् अहृत। जहार जह्रतुः जहर्थ जह्रिव जह्र। हर्त्तासि-से। हियात् हृषीष्ट। हरिषति-ते। कर्म्मणि ह्रियते। अहारि अहारिषाताम् अहृषाताम्। णिचि हारयति-ते अजीहरत्-त। सनि जिहीर्षति-ते।

कृत्सु हरणीयम्। हरणम्। हरः। प्रहारः। मनोहरः। हारकः। नाथहरिः। हारी। हर्त्ता। हृतः। हृतिः। हर्त्तव्यम्। हर्त्तुम्। हृत्वा। प्रहृत्य। हार्य्यम्। हर-न्

Digitized by Google

माणः हियमाणः। हरि-यान् यमाणः। कर्मणि हारियमाणश्च। प्र-प्रहारे प्रहरति प्रहृतः प्रहरणम्। अप अपहृतौ (दूरीकरणे) अपहरति अपहृतः। सम् संहारे (नाशने) संहरति संहृतः संहारः। अनु-अनुकरणे अनुहरति अनुहरणम् गत्यनुकारे आत्म० अनुहरते। वि—विहारे। विहरति विहृतः विहारः। आ—आहारे आहरति आहृतः आहरणम्। उद् उद्धारे उद्धरति उद्धृतः उद्धारः। सम् अभि साहित्य करणे। समभिहरति समभिहृतः

वि-आ-कथने व्याहरति व्याहारः व्याहृतिः। अभि अव भोजने अभ्यवहरति अभ्यवहारः। अभ्यवहृतः। निर्—निर्हरणे निर्हरति निर्हारः।

हृष तुष्टौ दिवा० पर० अक० सेट्।

कर्तरि हृष्यति। हृष्येत्। हृष्यतु। अहृष्यत्। अहृषत् अहर्षीत्। जहर्ष जहृषतुः। हर्षिता। हृष्यात्। हर्षिष्यति। भावे हृष्यते। अहर्षि। णिचि हर्षय ति-ते। अजीहृषत्-त-अजहर्षत्-त।

कृत्सु हर्षणीयस् हर्षणम्। हर्षः। हर्षकः। हर्षी। हर्षिता। हृषितः-हृष्टः। हृष्टिः। हर्षितव्यम् हृष्ट्वा। प्रहृष्य। हृष्यम्। हृष्यन् हर्षिष्यन्।

हृ चौर्ये अदा० आत्म० सक० अनिट्।

कर्तरि हरुते हरुवाते हरुवते। हरुवीत। हरुताम् अहरुत। अहरोष्ट। जुहरुवे हरोतासे। हरोषीष्ट। हरोष्यते। कर्मणि

क्रूयते। अक्राविं अक्राविषाताम्। अक्रोषाताम् णिचि क्रावयति-ते अजुक्रवत्-त।

क्रत्सु क्रवनीयम्। क्रवनम् क्रवः। क्रावकः। क्रावी। क्रोता। क्रुतः। क्रुतिः। क्रोतव्यम्। क्रुत्वा। प्रक्रुत्य। क्रव्यम् क्राव्यम्। क्रुवानः क्रूयमानः। क्रोष्यमाणः कर्मणि क्राविष्यमाणश्च। अप—अपलापे अपक्रुते अपक्रुतः। नि-गोपने निक्रुते निक्रवः।

क्री लज्जायां जुहो० पर० अक० अनिट्।

कर्त्तरि जिक्रेति जिक्रीतः जिक्रियति जिक्रेषि जिक्रीथः जिक्रेमि। जिक्रीयात्। जिक्रेतु। अजिक्रेत्। अक्रैषीत्। जिक्रियाम्बभूव आस-चकार-जिक्राय। आमभाव पक्षे जिक्रियतुः जिक्रयिथ जिक्रेथ। क्रेतासि। क्रीयात्। क्रेष्यति। भावे क्रीयते। अक्रायि। णिचि क्रेपयति-ते अजिक्रिपत् त।

क्रत्सु क्रयणीयम्। क्रयणम्। क्रयः। क्रायकः। क्रायी। क्रेता। क्रीणः। क्रीतिः। क्रेतुम् क्रीत्वा प्रक्रीय। क्रेयम्। जिक्रियत् क्रेष्यन्।

क्ली स्पर्द्धायाम् भ्वा० उभ० सक० अनिट् यजादि।

कर्त्तरि क्लयति-ते। क्लयेत्-त। क्लयतु-ताम्। अक्लयत् त। अक्लत् अक्लत—अक्लास्त। जुहाव जुहुवतुः जुहविथ-जुहोथ जुहुवे। क्लाता-सि-से। क्लयात् क्लासीष्ट। क्लास्यति-ते। कर्मणि क्लयते। अक्लायि अक्लायिषाताम् अक्ला-

Digitized by Google

सताम् । णिचि ह्रापयति ते अजूह्वत् त ।
ह्रत्सु ह्रानीयम् । ह्रानम् । ह्रायकः । ह्रायी । ह्राता । ह्रतः ।
ह्रतिः । ह्रातुम् । ह्रत्वा । आह्रय । ह्रेयम् । ह्रयन् मानः
ह्रयमानः । ह्रास्यन् स्यमानः । कर्मणि ह्रायिष्यमाणश्च ।
आ—आह्राने आम० आह्रयते आह्रयमानः । आह्रानम्
आह्रतः ओं तत्सत् ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यविरचितः
अकारादिह्रान्तवर्णादिकप्रसिद्धधातुरूपादर्शः समाप्तः ।

Digitized by Google

७ काव्यसंग्रह (सम्पूर्ण) ५
८ विक्रमोर्वशी सटीक ।०
९ ऋतुसंहार सटीक ।=
१० विक्रमोर्वशी सटीक १॥०
११ वसन्ततिलकभाष ।=
१२ गायत्री व्याख्या ॥०
१३ सांख्यदर्शन (भाष्यसहित)
सांख्य प्रवचन भाष्य २
१४ भोजप्रबन्ध ।॥०
१५ नलोदय सटीक ॥=
१६ ईश केन कठ प्रश्न मुण्ड
माण्डूक्य, (सटीक सभाष्य) ५
१७ छान्दोग्य (उपनिषद्)
सभाष्य सटीक ५
१८ तैत्तिरीय ऐतरेय श्वेताश्वतर
(उपनिषद्) सभाष्य सटीक २
१९ बृहदारण्यक (उपनिषद्)
सभाष्य सटीक १०
२० सुश्रुत वैद्यक ४
२१ शार्ङ्गधर वैद्यक १
२२ वेताल पञ्चविंशतिः ।॥०
२३ पातञ्जल दर्शन (सभाष्य सटीक) ४
२४ आत्मतत्त्वविवेक बौद्धाधिकार २
२५ मुक्तिकोपनिषत् =
२६ उपमान चिन्तामणि ।०
२७ नागानन्द नाटक १
२८ पूर्णप्रज्ञदर्शनम् मध्वस्वामि
कृत भाष्यसहितम् २
२९ चन्द्रशेखर चम्पू काव्यम्
सम्पूर्ण ३
३० सामवेदस्य मन्त्र ब्राह्मणम्
भाष्य सहितम् २
३१ आरण्यसंहिता भाष्यसहित १
३२ विद्वशालभञ्जिका नाटिका स० १
३३ कारण्डव्यूह बौद्धग्रन्थम् २
३४ कुवलयानन्द सटीक अल० २
३५ प्रियदर्शिका नाटिका सटीक
श्रीहर्ष विरचित ॥०
३६ सारस्वत व्याकरण स० पूर्वार्द्ध १।
३७ वासवदत्ता सटीक २
३८ कालिदास कृत
पुष्पबाण विलास काव्य सटीक ॥०
३९ महिम्न स्तवकम् पदारविन्द
स्तवकम् स्तुति स्तवकम्, मन्दस्मित
स्तवकम्, कटाक्ष स्तवकम् १
८० मनुसंहिता कुल्लुकभट्ट कृत
टीका सहित ५
८१ नैषध चरितम् मल्लिनाथ
कृत टीका सहित १०
८२ चन्द्रालोक प्राचीन अलङ्कार॥०
८३ वीरमित्रोदय स्मृति ग्रन्थ १०
८४ भावप्रकाश वैद्यक १०
८५ प्रबोधचन्द्रोदय
नाटक सटीक २

Digitized by Google

८६ अनर्घराघव नाटक
मुरारि कृत २
८७ दैवतब्राह्मण सभाष्य १
८८ षड्विंश ब्राह्मण १
८९ मीमांसा परिभाषा ॥०
९० अर्थ संग्रह लौग क्षी कृत
मीमांसा ॥०
९१ रघुवंश सटीक १॥०
९२ मेघदूत सटीक ।॥०
९३ ईश्वरनिरूपणम्
तर्कावस्मृति कृतम् १
९४ ईश्वरानुमानचिन्तामणि
गङ्गेशोपाध्याय कृत १
९५ न्यायदर्शन सभाष्य सवृत्ति २॥)
९६ सटीक वाल्मीकि रामायण
बालकाण्डस्य प्रथमावधि
त्रयोदश सर्गपर्य्यन्तम् १॥०
९७ सटीक वाल्मीकि रामायण
बालकाण्डस्य चतुर्दश सर्गा-
वधि पञ्चविंशति सर्ग
पर्य्यन्तम् ।॥०
९८ मदनपाल निघण्टु वैद्यक १
९९ संस्कृतशिक्षामञ्जरीप्रथमभागः —
१०० संस्कृत शिक्षामञ्जरी
द्वितीय भाग ।०
१०१ साहित्यदर्पण
१०२ श्रीहर्षचरित बाण भट्टकृत
१०३ अमर कोष
१०४ वेदान्तसूत्र शङ्करावार्य कृत
शारीरकभाष्य तथा गोविन्दानन्द
कृतटीका सहित
१०५ वेदान्त परिभाषा
१ ६ वेदान्तसार सटीक
१०७ सटीक निदान
१०८ कामन्दकी नीतिसार
१०९ मल्लिकामारुत प्रकरण
११० अत्रि, विष्णु, हारीत,
याज्ञवल्क्य उशना अङ्गिरा शङ्ख
आपस्तम्ब, संवर्त्त कात्यायन बृह
स्पति पराशर व्यास शंख लिखित
दक्ष गौतम शातातप वशिष्ठ शौ
संहिता (धर्मशास्त्र
१११ मत्स्यपुराण
११२ चरकसंहिता (वैद्यक)
सम्पूर्ण
११३ रसेन्द्रचिन्तामणि वैद्यक
११४ भगवद् गीता शाङ्करभा
आनन्दगिरि कृत टीका
सुबोधिनी सहित
११५ शब्दशक्तिप्रकाशिका ॥

कलिकाता संस्कृत विद्या मन्दिरे—वि, ए, उपाधिधारिणः
श्रीजीवानन्दविद्यासागर-भट्टाचार्य्यस्य सकाशात् लभ्यानि।

Digitized by Google